
कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

260

इदंपुस्तकमष्टाध्यायाह्नियंम्॥श्रीविश्वेश्वरायनमः

(1)

आ शाइ अ साना ध स्य लोक स्य ज्ञा नांजनश लाक या। चक्षुरु न्मी लितं येन तस्मै पा णिनै य्यायी

१ श्री गणेशायनमः। येनाक्षरसमाम्नायमधिगम्य महेश्वरात्। कृत्स्नं व्याकरणं प्रोक्तं त
स्मै पाणिनये नमः। १। येन धौता गिरः पुंसां विमलैः शब्दवारिभिः। तमश्चाज्ञानजं
भिन्नं तस्मै पाणिनये नमः। अइउण्। ऋलृक्। एओङ्। ऐऔच्। हयवरट्। लण्
। ञमङणनम्। झभञ्। घढधष्। जबगडदश्। खफछठथचटतव्। कपय्। श
षसर्। हल्। वृद्धिरादैच्। अदेङ्गुणः। इको गुणवृद्धी। न धातुलोप आर्धधातुके
। क्ङिति च। दीधीवेवीटां। हलोनंतराः संयोगः। मुखनासिकावचनोनुनासिकः।
तुल्यास्य प्रयत्नं सवर्णम्। नाज्झलौ। ईदूदेद्द्विवचनं प्रगृह्यं। अदसो मात्। श।
निपात एकाजनाङ्। ओत्। संबुद्धौ शाकल्यस्येतावनार्षे। उञः। ऊं। ईदूतौ च स
प्तम्यर्थे। दाधाघ्वदाप्। आद्यंतवदेकस्मिन्। तरप्तमपौ घः। बहुगणवतुडति
संख्या। ष्णांता षट्। डति च। क्तक्तवतू निष्ठा। सर्वादीनि सर्वनामानि। विभा
षा दिक्समासे बहुव्रीहौ। तृतीयासमासे। द्वन्द्वे च। विभाषा जसि। प्रथमचर

१ न बहुव्रीहौ।

मतयाल्पार्द्धकतिपयनेमाश्च। पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थाया
मसंज्ञायां। स्वमज्ञातिधनाख्यायां। अंतरं बहिर्योगोपसंव्यानयोः। स्वरादिनि
न२ पातमव्ययं। तद्धितश्चासर्वविभक्तिः। कृन्मेजन्तः। क्त्वातोसुन्कसुनः। अव्ययीभावश्च।
शि सर्वनामस्थानं। सुडनपुंसकस्य। नवेति विभाषा। इग्यणः संप्रसारणं। आद्यं
तौ टकितौ। मिदचोंत्यात्परः। एच इग्घ्रस्वादेशे। षष्ठी स्थानेयोगा। स्थानेंतरतमः।
उरण्रपरः। अलोंत्यस्य। ङिच्च। आदेः परस्य। अनेकाल्शित्सर्वस्य। स्थानिवदा
देशोनल्विधौ। अचः परस्मिन्पूर्वविधौ। नपदांतद्विर्वचनवरेयलोपस्वरसवर्णा
नुस्वारदीर्घजश्चर्विधिषु। द्विर्वचनेऽचि। अदर्शनं लोपः। प्रत्ययस्य लुक्श्लुलु
पः। नलुमतांगस्य। अचोंत्यादिटि। अलोंत्यात्पूर्व उपधा। तस्मिन्निति निर्दिष्टे
पूर्वस्य। तस्मादित्युत्तरस्य। स्वं रूपं शब्दस्याशब्दसंज्ञा। अणुदित्सवर्णस्य चाप्र
त्ययः। तपरस्तत्कालस्य। आदिरंत्येन सहेता। येन विधिस्तदंतस्य। वृद्धिर्यस्या

प्रत्ययलोपे प्रत्ययलक्षणं॥२

चामादिस्तद्धे। त्यदादीनिच। एङ्प्राचांदेशे। वृद्धिराद्यंतवदव्ययीभावः प्र
त्ययस्यलुकंपंचदश। इतिप्रथमाध्यायस्यप्रथमःपादः॥१॥ गाङ्कुटादिभ्योञ्णिन्
ङित्। विजइट्। विभाषोर्णोः। सार्वधातुकमपित्। असंयोगाल्लिट्कित्। इं
न्धिभवतिभ्यांच। मृडमृदगुधकुषक्लिशवदवसः क्त्वा। रुदविदमुषग्रहिस्वपिप्र
च्छःसंश्च। इकोझल्। हलंताच्च। लिङ्सिचावात्मनेपदेषु। उश्च। वागमः। हनःसिच्। यमो
गंधने। विभाषोपयमने। स्थाघ्वोरिच्च। नक्त्वासेट्। निष्ठाशीङ्स्विदिमिदिक्ष्विदिधृ
षः। मृषस्तितिक्षायां। उदुपधाद्भावादिकर्मणोरन्यतरस्यां। पूङःक्त्वाच। नोपधात्
थफांताद्वा। वंचिलुंच्यृतश्च। तृषिमृषिकृशेःकाश्यपस्य। रलोव्युपधाद्धलादेःसं
श्च। ऊकालोज्झ्रस्वदीर्घप्लुतः। अचश्च। उच्चैरुदात्तः। नीचैरनुदात्तः। समाहारःस्वरितः
तस्यादितउदात्तमर्धह्रस्वं। एकश्रुतिदूरात्संबुद्धौ। यज्ञकर्मण्यजपन्यूङ्खसामसु। उ
च्चैस्तरांवावषट्कारः। विभाषाछंदसि। नसुब्रह्मण्यायांस्वरितस्यतूदात्तः। देवब्रह्मणो

स्य

रनुदात्तः । स्वरितात्संहितायामनुदात्तानां । उदात्तस्वरितपरस्य सन्नतरः । अपृक्त एकाल्
प्रत्ययः । तत्पुरुषः समानाधिकरणः कर्मधारयः । प्रथमानिर्दिष्टं समास उपसर्जनं । एक
विभक्ति चापूर्वनिपाते । अर्थवदधातुरप्रत्ययः प्रातिपदिकं । कृत्तद्धितसमासाश्च । हस्वो
नपुंसके प्रातिपदिकस्य । गोस्त्रियोरुपसर्जनस्य । लुक् तद्धितलुकि । इ[illegible]ण्याः । लुपि यु ग्रो ४
क्तवद्व्यक्तिवचने । विशेषणानां चाजातेः । तदशिष्यं संज्ञाप्रमाणत्वात् । लुब्योगाप्रख्या
नात् । योगप्रमाणे च तदभावेऽदर्शनं स्यात् । प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाण
त्वात् । कालोपसर्जने च तुल्यं । जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्यां । अस्मदो
द्वयोश्च । फल्गुनीप्रोष्ठपदानां च नक्षत्रे । छंदसि पुनर्वस्वोरेकवचनं । विशाखयोश्च ।
तिष्यपुनर्वस्वोर्नक्षत्रद्वंद्वे बहुवचनस्य द्विवचनं नित्यं । सरूपाणामेकशेष एकवि
भक्तौ । वृद्धो यूना तल्लक्षणश्चेदेव विशेषः । स्त्री पुंवच्च । पुमान् स्त्रिया । भ्रातृपुत्रौ स्व

स्तृदुहितृभ्यां। नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यां। पितामात्रा। श्वशुरः श्वश्र्वा। त्यदादीनि
सर्वैर्नित्यं। ग्राम्यपशुसंघेष्वतरुणेषु स्त्री। गांकुटायुदुपधादपृक्तश्छंदसि पुनर्वस्वोस्त्रियो
दश॥२ इति प्रथमाध्यायस्य द्वितीयः पादः। भूवादयो धातवः। उपदेशेजनुनासिक इत्। हलं
त्यं। न विभक्तौ तुस्माः। आदिर्ञिटुडवः। षः प्रत्ययस्य। चुटू। लशक्वतद्धिते। तस्य लो
पः। यथासंख्यमनुदेशः समानां। स्वरितेनाधिकारः। अनुदात्तङित आत्मनेपदं। भा
वकर्म्मणोः। कर्तरि कर्मव्यतिहारे। न गतिहिंसार्थेभ्यः। इतरेतरान्योन्योपपदाच्च। ने
र्विशः। परिव्यवेभ्यः क्रियः। विपराभ्यां जेः। आङो दोनास्यविहरणे। क्रीडोनुसंपरिभ्य
श्च। समवप्रविभ्यः स्थः। प्रकाशनस्थेयाख्ययोश्च। उदोनूर्द्ध्वकर्म्मणि। उपान्मंत्रकरणे
। अकर्मकाच्च। उद्विभ्यां तपः। आङो यमहनः। समो गम्यृच्छिप्रच्छिस्वरत्यर्तिश्रुविदिभ्यः
। निसमुपविभ्यो ह्वः। स्पर्द्धायामाङः। गंधनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रक
थनोपयोगेषु कृञः। अधेः प्रसहने। वेः शब्दकर्म्मणः। अकर्म्मकाच्च। संमाननोत्संज

नाचार्य्यकरणज्ञानभृतिविगणनव्ययेषु नियः। कर्तृस्थे चाशरीरे कर्म्मणि। वृत्तिसर्ग
तायनेषु क्रमः। उपपराभ्यां। आङ उद्गमने। वेः पादविहरणे। प्रोपाभ्यां समर्थाभ्यां। अ
नुपसर्गाद्वा। अपन्हवे ज्ञः। अकर्मकाच्च। संप्रतिभ्यामनाध्याने। भासनोपसंभाषा
ज्ञानयत्नविमत्युपमंत्रणेषु वदः। व्यक्तवाचां समुच्चारणे। अनोरकर्मकात्। वि
हः ५ भाषा विप्रलापे। अवाद्ग्रः। समः प्रतिज्ञाने। उदश्चरः सकर्म्मकात्। समस्तृतीयायु
क्तात्। दाणश्च सा चेच्चतुर्थ्यर्थे। उपाद्यमः स्वकरणे। ज्ञाश्रुस्मृदृशां सनः। नानोर्ज्ञः। प्र
त्याङ्भ्यां श्रुवः। शदेः शितः। म्रियतेर्लुङ्लिङोश्च। पूर्ववत्सनः। आम्प्रत्ययवत्कृञो
नुप्रयोगस्य। प्रोपाभ्यां युजेरयज्ञपात्रेषु। समः क्ष्णुवः। भुजोऽनवने। णेरणौ यत्क
र्म्मणौ चेत्स कर्त्तानाध्याने। भीस्म्योर्हेतुभये। गृधिवंच्योः प्रलंभने। लियः संमा
ननशालीनीकरणयोश्च। मिथ्योपपदात्कृञोऽभ्यासे। स्वरितञितः कर्त्रभिप्राये क्रि
याफले। अपाद्वदः। णिचश्च। समुदाङ्भ्यो यमोऽग्रंथे। अनुपसर्गाज्ज्ञः। विभाषोपपदे

नप्रतीयमाने। शेषात्कर्तरि परस्मैपदं। अनुपराभ्यां कृञः। अभिप्रत्यतिभ्यः क्षिपः।
प्राद्वहः। परेर्मृषः। व्याङ्परिभ्यो रमः। उपाच्च। विभाषाकर्मकात्। बुधयुधनशजने
ना।३ ङ्प्रुद्रुस्रुभ्यो णेः। निगरणचलर्थेभ्यश्च। अणावकर्मकाच्चित्तवत्कर्तृकात्। न
पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः। वाक्यषः। द्युद्भ्यो लुङि। वृद्भ्यः स्यस
नोः। लुटि च कॢपः। भूवादयः क्रीडोऽनुवेः पादम्रियतेः प्राद्वह स्त्र्यादशा। इति प्रथ
माध्यायस्य तृतीयः पादः। आकडारादेका संज्ञा। विप्रतिषेधे परं कार्यं। यूस्त्र्याख्यौ
नदी। नेयुवङुवङ्स्थानावस्त्री। वामि। ङिति ह्रस्वश्च। शेषो घ्यसखि। पतिः समास
एव। षष्ठीयुक्तश्छन्दसि वा। ह्रस्वं लघु। संयोगे गुरु। दीर्घं च। यस्मात्प्रत्ययविधिस्त
दादि प्रत्ययेऽङ्गं। सुप्तिङन्तं पदं। नः क्ये। सिति च। स्वादिष्वसर्वनामस्थाने। यचि भं
तसौ मत्वर्थे। अयस्मयादीनि छन्दसि। बहुषु बहुवचनं। द्व्येकयोर्द्विवेनैकवचने। कार च
के। ध्रुवमपायेऽपादानं। भीत्रार्थानां भयहेतुः। पराजेरसोढः। वारणार्थानामीप्सितः।
अन्तर्धौ येनादर्शनमिच्छति। आख्यातोपयोगे। जनिकर्तुः प्रकृतिः। भुवः प्रभवः।

कर्म्मणा यमभिप्रैति स संप्रदानं।रुच्यर्थानां प्रीयमाणः।श्लाघह्नुङ्स्थाश
पां ज्ञीप्स्यमानः।धारेरुत्तमर्णः।स्पृहेरीप्सितः।क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रतिको
पः।क्रुधद्रुहोरुपसृष्टयोः कर्म्म।राधीक्ष्योर्यस्य विप्रश्नः।प्रत्याङ्भ्यां श्रुवः पूर्वस्य
कर्त्ता।अनुप्रतिगृणश्च।साधकतमं करणं।दिवः कर्म्म च।परिक्रयणे संप्रदा
नमन्यतरस्यां।आधारोधिकरणं।अधिशीङ्स्थासां कर्म्म।अभिनिविशश्च।उ
पान्वध्याङ्वसः।कर्तुरीप्सिततमं कर्म्म।तथायुक्तं चानीप्सितं।अकथितं च।गतिबु
द्धिप्रत्यवसानार्थशब्दकर्म्मा[illegible] कर्म्मकाणामणि कर्त्ता स णौ।[illegible]
[illegible]हृक्रोरन्यतरस्यां।स्वतंत्रः कर्त्ता।तत्प्रयोजको हेतुश्च
।प्राग्रीश्वरान्निपाताः।चादयोसत्वे।प्रादयः।उपसर्गाः क्रियायोगे।गतिश्च।
ऊर्यादिच्विडाचश्च।अनुकरणं चानितिपरं।आदरानादरयोः सदसती।भू
षणेलं।अंतरपरिग्रहे।कणेमनसी श्रद्धाप्रतिघाते।पुरोव्ययं।अस्तं च।

अछ गत्यर्थवदेषु। अदोनुपदेशे। तिरोन्तर्द्धौ। विभाषा कृञि। उपाजे न्वाजे। साक्षात्प्रभृतीनि च। अनत्याधान उरसिमनसि। मध्ये पदे निवचने च। नित्यं हस्ते पाणावुपयमने। प्राध्वं बंधने। जीविकोपनिषदा वौपम्ये। ते प्राग्धातोः। छंदसि परेपि। व्यवहिताश्च। कर्मप्रवचनीयाः। अनुर्लक्षणे। तृतीयार्थे। हीने। उपोधिके च। अपपरी वर्जने। आङ्मर्यादावचने। लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः। अभिरभागे। प्रतिः प्रतिनिधिप्रतिदानयोः। अधिपरी अनर्थकौ। सुः पूजायां। अतिरतिक्रमणे च। अपिः पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेषु। अधिरीश्वरे। विभाषा कृञि। लः परस्मैपदं। तङानावात्मनेपदं। तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः। तान्येकवचनद्विवचनबहुवचनान्येकशः। सुपः। विभक्तिश्च। युष्मद्युपपदे समानाधिकरणे

स्थानिन्यपि मध्यमः। प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च।
अस्मद्युत्तमः। शेषे प्रथमः। परः सन्निकर्षः संहिता। विरामावसानं।
आकडाराद्दुष्वनुप्रतिगृणाउर्यादिछंदसि तिऊनदश। इति प्रथमा
ध्यायस्य चतुर्थः पादः। इति प्रथमोऽध्यायः समाप्तः। समर्थः पदविधिः
। सुपामंत्रिते पराङ्गवत्स्वरे। प्राक्कडारात्समासः। सह सुपा। अव्ययी
भावः। अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिश
ब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसंपत्तिसाकल्यांतवच
नेषु। यथासादृश्ये। यावदवधारणे। सुप्प्रतिना मात्रार्थे। अक्षशलाकासं
ख्याः परिणा। विभाषा। अपपरिबहिरंचवः पंचम्या। आङ्मर्यादाभि
विध्योः। लक्षणेनाभिप्रती आभिमुख्ये। अनुर्यत्समया। यस्य चायामः

तिष्ठद्गुप्रभृतीनिच। पारेमध्येषष्ठ्यावा। संख्यावंश्येन। नदीभिश्च।
अन्यपदार्थेचसंज्ञायां। तत्पुरुषः। द्विगुश्च। द्वितीयाश्रितातीतपतित
गतात्यस्तप्राप्तापन्नैः। स्वयंक्तेन। खट्वाक्षेपे। सामि। कालाः। अत्यं
न४ तसंयोगेच। तृतीयातत्कृतार्थेनगुणवचनेन। पूर्वसदृशसमोनार्थ
कलहनिपुणमिश्रश्लक्ष्णैः। कर्तृकरणेकृताबहुलं। कृत्यैरधिका
र्थवचने। अन्नेनव्यंजनं। भक्ष्येणमिश्रीकरणं। चतुर्थीतदर्थार्थब
लिहितसुखरक्षितैः। पंचमीभयेन। अपेतापोढमुक्तपतितापत्रस्तै
रल्पशः। स्तोकान्तिकदूरार्थकृच्छ्राणिक्तेन। सप्तमीशौण्डैः। सिद्धशु
ष्कपक्वबंधैश्च। ध्वांक्षेणक्षेपे। कृत्यैरृणे। संज्ञायां। क्तेनाहोरात्रावय
वाः। तत्र। क्षेपे। पात्रेसमितादयश्च। पूर्वकालैकसर्वजरत्पुराणनवके

नार

त्रे प्रथमा। संबोधने च। सामंत्रितं। एकवचनं संबुद्धिः। षष्ठी शेषे। ज्ञोविदर्थस्य करणे।
अधीगर्थदयेशा कर्म्मणि। कृञः प्रतियत्ने। रुजार्थानां भाववचनानाम ज्वरेः। आशिषि नाथः
यः। जासि निप्रहण नाटक्राथपिषां हिंसायां। व्यवहृपणोः समर्थयोः। दिवस्तदर्थ
स्य। विभाषोपसर्गे। द्वितीया ब्राह्मणे। प्रेष्यब्रुवोर्हविषो देवतासंप्रदाने।
चतुर्थ्यर्थे बहुलं छंदसि। यजेश्च करणे। कृत्वोर्थप्रयोगे कालेधिकरणे।
। कर्तृकर्मणोः कृति। उभयप्राप्तौ कर्म्मणि। क्तस्य च वर्तमाने। अधिकरण
वाचिनश्च। न लोकाव्ययनिष्ठाखलर्थतृनाम्। अकेनोर्भविष्यदाध नाः४
मर्ण्ययोः। कृत्यानां कर्तरि वा। तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतर
स्यां। चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः। अनभि
हिते इत्यंयतश्च प्रेष्यब्रुवोस्त्रयोदश॥ इति द्वितीयाध्यायस्य तृतीयः
पादः॥

कृत १

कं यस्य चेश्वरवचनं तत्र सप्तमी। पंचम्यपाङ्परिभिः। प्रतिनिधिप्रतिदाने च यस्मात्। ग
त्यर्थकर्म्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि। चतुर्थी संप्रदाने। क्रियार्थोपपदस्य
च कर्म्मणि स्थानिनः। तुमर्थाच्च भाववचनात्। नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च
। मन्यकर्म्मण्यनादरे विभाषाऽप्राणिषु। कर्तृकरणयोस्तृतीया। सहयुक्तेऽप्रधाने। येनांग
विकारः। इत्थंभूतलक्षणे। संज्ञोन्यतरस्यां कर्म्मणि। हेतौ। अकर्तर्यृणे पंचमी। विभाषा ऋ।५
गुणेऽस्त्रियां। षष्ठी हेतुप्रयोगे। सर्वनाम्नस्तृतीया च। अपादाने पंचमी। अन्यारादितर
क्ष।६ र्ते दिक्शब्दांचूत्तरपदाजाहियुक्ते। षष्ठ्यतसर्थप्रत्ययेन। एनपा द्वितीया। पृथग्विनानाना
भिस्तृतीयान्यतरस्यां। करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्ववचनस्य। दूरांतिका
क्ष।४ र्थैः षष्ठ्यन्यतरस्यां। दूरांतिकार्थेभ्यो द्वितीया च। सप्तम्यधिकरणे च। यस्य च भावेन भा
वलक्षणं। षष्ठी चानादरे। स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च। आयु
क्तकुशलाभ्यां चासेवायां। यतश्च निर्द्धारणं। पंचमी विभक्ते। साधुनिपुणाभ्यां सप्तम्य
प्रतेः। प्रसितोत्सुकाभ्यां तृतीया च। नक्षत्रे च लुपि। प्रातिपदिकार्थलिंगपरिमाणवचनमा

वलाः समानाधिकरणेन। दिक्संख्ये संज्ञायां। तद्धितार्थोत्तर
पदसमाहारे च। संख्यापूर्वो द्विगुः। कुत्सितानि कुत्सनैः। पापाणके कु
त्सितैः। उपमानानि सामान्यवचनैः। उपमितं व्याघ्रादिभिः सामान्या
प्रयोगे। विशेषणं विशेष्येण बहुलं। पूर्वापरप्रथमचरमजघन्यसमा
नमध्यममध्यमवीराश्च। श्रेण्यादयः कृतादिभिः। क्तेन नञ्विशिष्टेनानञ्
। सन्महत्परमोत्कृष्टाः पूज्यमानैः। वृन्दारकनागकुञ्जरैः पूज्यमानं। कतर
कतमौ जातिपरिप्रश्ने। किं क्षेपे। पोटायुवतिस्तोककतिपयगृष्टिधे
नुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः। प्रशंसाव
चनैश्च। युवा खलतिपलितवलिनजरतीभिः। कृत्यतुल्याख्या अजात्या।
वर्णो वर्णेन। कुमारः श्रमणादिभिः। चतुष्पादो गर्भिण्या। मयूरव्यंसकाद
यश्च। समर्थान्यपदार्थे सिद्धं सन्महदादशाः। इति द्वितीयाध्यायस्य प्रथ
सुष्क १

पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे । अर्द्धं नपुंसकं । द्वितीयतृतीयचतुर्थतु
र्य्याण्यन्यतरस्यां । प्राप्तापन्ने च द्वितीयया । कालाः परिमाणिना । नञ् । ईषदकृता
। षष्ठी । याजकादिभिश्च । न निर्द्धारणे । पूरणगुणसुहितार्थसदव्ययतव्यसमाना
धिकरणेन । क्तेन च पूजायां । अधिकरणवाचिना च । कर्मणि च । तृजकाभ्यां
कर्तरि । कर्तरि च । नित्यं क्रीडाजीविकयोः । कुगतिप्रादयः । उपपदमतिङ् । अ
मैवाव्ययेन । तृतीयाप्रभृतीन्यन्यतरस्यां । क्त्वा च । शेषो बहुव्रीहिः । अनेकमन्यपदा
र्थे । संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये । दिङ्नामान्यन्तराले । तत्र तेने
दमिति सरूपे । तेन सहेति तुल्ययोगे । चार्थे द्वंद्वः । उपसर्जनं पूर्वं । राजदंतादिषु परं । द्वंद्वे घि
। अजाद्यदंतं । अल्पाच्तरं । सप्तमीविशेषणे बहुव्रीहौ । निष्ठा । वाहिताग्न्यादिषु । कडाराः कर्म
धारये । पूर्वापराधरोत्तरं तृतीयाप्रभृतीन्यष्टादश । इति द्वितीयाध्यायस्य द्वितीयः पादः ॥२॥ अ
नभिहिते । कर्मणि द्वितीया । तृतीया होश्छंदसि । अंतरांतरेण युक्ते । कालाध्वनोरत्यंतसंयो
गे । अपवर्गे तृतीया । सप्तमीपंचम्यौ कारकमध्ये । कर्म्मप्रवचनीययुक्ते द्वितीया । यस्मादधि

पा॰ ६

अनुवादे चरणानाम्।

द्विगुरेकवचनं। द्वंद्वश्च प्राणितूर्यसेनांगानाम्। अध्वर्युक्रतुरनपुंस
कं। अध्ययनतोऽविप्रकृष्टाख्यानाम्। जातिरप्राणिनाम्। विशिष्ट
लिंगो नदी देशोऽग्रामाः। क्षुद्रजंतवः। येषां च विरोधः शाश्वतिकः। शूद्रा
णामनिरवसितानां। गवाश्वप्रभृतीनि च। विभाषा वृक्षमृगतृणधान्य
व्यंजनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणां। विप्रतिषिद्धं चानधि
करणवाचि। न दधिपयआदीनि। अधिकरणैतावत्त्वे च। विभाषा स
मीपे। स नपुंसकं। अव्ययीभावश्च। तत्पुरुषोऽनञ्कर्मधारयः। संज्ञायां
कंथोशीनरेषु। उपज्ञोपक्रमं तदाद्याचिख्यासायां। छाया बाहुल्ये। सभा
राजामनुष्यपूर्वा। अशाला च। विभाषा सेनासुराछायाशालानिशानां। परन शाला।

लिङ्गं द्वंद्व तत्पुरुषयोः। पूर्ववदश्ववडवौ। हेमन्तशिशिरावहोरात्रे च च्छंदसि। रात्राह्नाहाः पुंसि। अपथं नपुंसकं। अर्द्धर्चाः पुंसि च। इदमोन्वादेशे शानुदात्तस्तृतीयादौ। एतदस्त्रतसोस्त्रतसौ चानुदात्तौ। द्वितीयाटौस्स्वेनः। आर्द्धधातुके। अदोजग्धिर्ल्यप्ति किति। लुङ्सनोर्घस्लृ। घञपोश्च। बहुलंछंदसि। लिट्यन्यतरस्यां। वेञोवयिः। हनोवध लिङि। लुङि च। आत्मनेपदेष्वन्यतरस्यां। इणोगा लुङि। णौगमिरबोधने। सनि च। इङश्च। गाङ् लिटि। विभाषा लुङ्लृङोः। अस्तेर्भूः। ब्रुवोवचिः। चक्षिङः ख्याञ्। वा लिटि। अजेर्व्यघञपोः। वा यौ। एयक्षत्रियार्षञितो यूनि लुगणि

णोश्च संख्याकेनः २

ओः। पैलादिभ्यश्च। इञः प्राचां। न तौल्वलिभ्यः। तद्राजस्य बहुषु ते
नैवास्त्रियां। यस्कादिभ्यो गोत्रे। यञञोश्च। अत्रिभृगुकुत्सवशि
ष्ठगोतमाङ्गिरोभ्यश्च। बह्वच इञः प्राच्यभरतेषु। न गोपवनादिभ्यः
। तिककितवादिभ्यो द्वंद्वे। उपकादिभ्योन्यतरस्यामद्वंद्वे। आगस्त्य
यो ५ कौण्डिन्ययोरगस्तिकुण्डिनच्। सुपो धातुप्रातिपदिकयोः। अदिप्र
भृतिभ्यः शपः। बहुलं छंदसि। यङोऽचि च। जुहोत्यादिभ्यः श्लुः। गा
तिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु। विभाषा घ्राधेट्शाच्छासः।
तनादिभ्यस्तथासोः। मन्त्रेघसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो
लेः। आमः। अव्ययादाप्सुपः। नाव्ययीभावादतोम्त्वपंचम्याः। तृती

बहुलं छंदसि ४

यासस्तसभ्यो। बिडुलंम। लुटः प्रथमस्यडारौरसः। द्विरुपज्ञोपक्रमं
खिऔनेतोल्वालिभ्यश्चा मः पंच। इति द्वितीयाध्यायस्यचतुर्थः पा
दः। इति द्वितीयाध्यायः समाप्तः। २। प्रत्ययः। परश्च। आद्युदात्तश्च।
अनुदात्तौ सुप्पितौ। गुप्तिज्किद्भ्यःसन्। मान्बधदान्शान्भ्यो दीर्घ
श्चाभ्यासस्य। धातोः कर्मणः समानकर्तृकादिच्छायां वा। सुप आत्
मनः क्यच्। काम्यच्च। उपमानादाचारे। कर्तुः क्यङ्सलोपश्च। भृशा
दिभ्यो भुव्यच्वेर्लोपश्च हलः। लोहितादिडाज्भ्यः क्यष्। कष्टाय क्र
मणे। कर्मणो रोमन्थतपोभ्यां वर्तिचरोः। बाष्पोष्मभ्यामुद्वमने। श
ब्दवैरकलहाभ्रकण्वमेघेकरणे। सुखादिभ्यः कर्तृवेदनायां। न
भ्यः १

मोवरिवश्चित्रङः क्यच्। पुच्छभाण्डचीवराण्णिङ्। मुण्डमिश्रश्लक्ष्णलव
णव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच्। धातोरेकाचो हलादेः क्रियास
मभिहारे यङ्। नित्यं कौटिल्ये गतौ। लुपसदचरजपजभदहदशगॄ
भ्यो भावगर्हायां। सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचव
र्मवर्णचूर्णचुरादिभ्यो णिच्। हेतुमति च। कण्ड्वादिभ्यो यक्। गुपूधू
पविच्छिपणिपनिभ्य आयः। ऋतेरीयङ्। कमेर्णिङ्। आयादय आर्ध
धातुके वा। सनाद्यन्ता धातवः। स्यतासी लृलुटोः। सिब्बहुलं लेटि। का
स्प्रत्ययादाममन्त्रे लिटि। इजादेश्च गुरुमतोऽनृच्छः। दयायासश्च। उषवि
दजागृभ्योऽन्यतरस्यां। भीह्रीभृहुवां श्लुवच्च। कृञ्चानुप्रयुज्यते लिटि।
विदांकुर्वन्त्वित्यन्यतरस्यां। अभ्युत्सादयांप्रजनयांचिकयांरमयां

मकः। पावयांक्रियाद्विदामक्रन्निति छंदसि। च्लि लुङि। च्लेः सिच्। शल
इगुपधादनिटः क्सः। श्लिष आलिंगने। न दृशः। णिश्रिद्रुस्रुभ्यः क
र्तरि चङ्। विभाषा धेट्श्व्योः। गुपेश्छंदसि। नोनयतिध्वनयत्येलय
त्यर्दयतिभ्यः। अस्यतिवक्तिख्यातिभ्योऽङ्। लिपिसिचिह्वश्च। आत्मने

ता ५

पदेष्वन्यतरस्यां। पुषादिद्युताद्य्लृदितः परस्मैपदेषु। सर्तिशास्त्यर्तिभ्य
श्च। इरितो वा। जॄस्तंभुम्रुचुम्लुचुग्रुचुग्लुचुग्लुंचुश्विभ्यश्च। कृमृदृरु
हिभ्यश्छंदसि। चिण् ते पदः। दीपजनबुधपूरितायिप्यायिभ्योऽन्यतर
स्यां। अचः कर्मकर्तरि। दुहश्च। न रुधः। तपोऽनुतापे च। चिण् भावकर्म
णोः। सार्वधातुके यक्। कर्तरि शप्। दिवादिभ्यः श्यन्। वा भ्राशभ्लाशभ्र
मुक्रमुक्लमुत्रसित्रुटिलषः। यसोऽनुपसर्गात्। संयसश्च। स्वादिभ्यः

श्नुः। श्रुवः शृ च। अक्षोऽन्यतरस्यां। तनूकरणे तक्षः। तुदादिभ्यः शः। रुधादि
भ्यः श्नम्। तनादिकृञ्भ्य उः। धिन्विकृण्व्योर च। क्र्यादिभ्यः श्ना। स्तंभुस्तुंभु
स्कंभुस्कुंभुस्कुञ्भ्यः श्नुश्च। हलः श्नः शानज्झौ। छंदसि शायजपि। व्यत्ययो
बहुलं। लिङ्याशिष्यङ्। कर्मवत्कर्मणा तुल्यक्रियः। तपस्तपःकर्मक
स्यैव। न दुहस्नुनमां यक्चिणौ। कुषिरंजोः प्राचां श्यन्परस्मैपदं च। धा
तोः। तत्रोपपदं सप्तमीस्थं। कृदतिङ्। वासरूपोऽस्त्रियां। कृत्याः। तव्यत्तव
व्यानीयरः। अचो यत्। पोरदुपधात्। शकिसहोश्च। गदमदचरयमश्चा
नुपसर्गे। अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु। वह्यं करणं। अ
र्यः स्वामिवैश्ययोः। उपसर्या काल्या प्रजने। अजर्यं संगतं। वदः सुपि
क्यप् च। भुवो भावे। हनस्त च। एतिस्तुशास्वृदृजुषः क्यप्। ऋदुपधाच्चा

अध्या: एवु ल: ५

12

क्लृपि-चृतेः। ई-च खनः। भृञोऽसंज्ञायां। मृजे र्विभाषा। राजसूयसूर्यमृ
षोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः। भिद्योध्यौ नदे। पुष्यसिध्यौ नक्षत्रे।
विपूयविनीयजित्या मुञ्जकल्कहलिषु। प्रत्यपिभ्यां ग्रहेः। छंदसि। प
दास्वैरिबाह्यापक्ष्येषु च। विभाषा कृवृषोः। युग्यं च पत्रे। अमावास्यदन्य
तरस्यां। छंदसि निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्य्यस्तर्य्याध्व
र्य्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्यपृडानि।
ओ ५ ऋहलो र्ण्यत्। ओरावश्यके। आसुयुवपिरपिलपित्रपिचमश्च। आनाय्योऽनित्ये। प्रणाय्योऽसंम
ना ४ तौ। पाय्यसान्नाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीषु। क्रतौ कुण्डपाय्यसंचाय्यौ।
अग्नौ परिचाय्योपचाय्यसमुह्याः। चित्याग्निचित्ये च। ण्वुल्तृचौ। नंदिग्रहिपचादिभ्यो
ल्युणिन्यचः। इगुपधज्ञाप्रीकिरः कः। आतश्चोपसर्गे। पाघ्राध्माधेट्दृशः शः। अनुपसर्गा
ल्लिम्पविंदधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च। ददातिदधात्यो र्विभाषा। ज्वलि

तिकसंतेभ्योणः ।श्याद्व्यधास्रुसंस्र्वतीणवसावहृलिहश्लिषश्वसश्च ।दुन्योरनुपसर्गे ।विभा
षाग्रहः ।गेहेकः ।शिल्पिनिष्वुन् ।गस्थकन् ।ण्युट् च ।हश्च व्रीहिकालयोः ।प्रुसृल्वः समभिहारे
वुन् ।आशिषि च ।प्रस्ययोमुण्उ विदांकीपजनत्र्पादिभ्यो वघयुग्यंश्याद्व्यधादश ।इति तृती
याध्यायस्य प्रथमः पदः ।कर्मण्यण् ।ह्वावामश्च ।आतोनुपसर्गेकः ।सुपिस्थः ।तुंदशोकयोः
परिमृजापनुदोः ।प्रष्ठाज्ञः ।समिख्यः ।गापोष्टक् ।हरतेरनुद्यमनेच् ।वयसि च ।आङि ता
छील्ये ।अर्हः ।स्तम्बकर्णयोरमिजपोः ।शमिधातोः संज्ञायां ।अधिकरणेशेतेः ।चरेष्टः ।
भिक्षासेनादायेषु च ।पुरोग्रतोग्रेषुसर्तेः ।पूर्वेकर्तरि ।कृञोहेतुताच्छील्यानुलोम्येषु ।दिवा
विभानिशाप्रभाभास्कारांतानंतादिबहुनांदीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्र
संख्याजंघाबाह्वहर्यत्तद्धनुररुष्षु ।कर्मणिभृतौ ।नशब्दश्लोककलहगाथावैरचाटु
सूत्रमंत्रपदेषु ।स्तंबशकृतोरिन् ।हरतेर्दृतिनाथयोः पशौ ।फलेग्रहिरात्मंभरिश्च ।छं
दसिवनसनरक्षिमथां ।राजेः खशः ।नाशिकास्तनयोर्ध्माधेटोः ।नाडीमुष्ट्योश्च ।उदि

कूलेरूजिवहोः। वहाभ्रे लिहः। परिमाणे पचः। मितनखे च। विध्वरुषोस्तुदः। असूर्य लला
टयोर्दृशितपोः। उग्रंपश्येरम्मदपाणिंधमाश्च। प्रियवशे वदः खच्। द्विषत्परयोस्तापेः। वा
चि यमो व्रते। पूःसर्वयोर्दारिसहोः। सर्वकूलाभ्रकरीषेषु कषः। मेघर्तिभयेषु कृञः। क्षेम
प्रियमद्रेऽण्च। आशिते भुवः करणभावयोः। संज्ञायां भृतृवृजिधारिसहितपिदमः। गम
श्च। अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः। आशिषि हनः। अपे क्लेशतमसोः। कुमारशीर्ष
योर्णिनिः। लक्षणे जायापत्योष्टक्। अमनुष्यकर्तृके च। शक्तौ हस्तिकपाटयोः। पाणि
घताडघौ शिल्पिनि। आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्
युन्। कर्तरि भुवः खिष्णुच्खुकञौ। स्पृशोऽनुदके क्विन्। ऋत्विग्दधृक्स्रग्दिगुष्णि
गञ्चुयुजिक्रुञ्चां च। त्यदादिषु दृशोऽनालोचने कञ्च। सत्सूद्विषद्रुहदुहयुजविदभिदच्छि
दजिनीराजामुपसर्गेऽपि क्विप्। भजो ण्विः। छन्दसि सहः। वहश्च। कव्यपुरीषपुरीष्येषु ञ्युट्।
हव्येऽनन्तःपादं। जनसनखनक्रमगमो विट्। अदोऽनन्ने। क्रव्ये च। दुहः कब्घश्च। मं

त्रेश्वेतवहो। क्थशस्पुरोडशो ण्विन्। अवेयजः। विजुपे छंदसि। आतो मनिन्क्वनिब्व-
निपश्च। अन्येभ्योपि दृश्यंते। क्विप् च। स्थः क च। सुप्यजातौ णिनिस्ताच्छील्ये। कर्तर्यु-
पमाने। व्रते। बहुलमाभीक्ष्ण्ये। मनः। आत्ममाने खश्च। भूते। करणे यजः। कर्मणि
हनः। ब्रह्मभ्रूणवृत्रेषु क्विप्। बहुलं छंदसि। सुकर्मपापमंत्रपुण्येषु कृञः। सोमे सुञः।
अग्नौ चेः। कर्मण्यग्न्याख्यायां। कर्मणीनिविक्रियः। दृशेः क्वनिप्। राजनि युधिकृञः।
सहे च। सप्तम्यां जनेर्डः। पंचम्यामजातौ। उपसर्गे च संज्ञायां। अनौ कर्मणि। अन्येष्वपि
दृश्यते। निष्ठा। सुयजोर्ङ्वनिप्। जीर्यतेरतृन्। छंदसि लिट्। लिटः कानज्वा। क्वसुश्च। भा-
षायां सदवसश्रुवः। उपेयिवाननाश्वाननूचानश्च। लुङ्। अनद्यतने लङ्। अभिज्ञाव-
चने लृट्। न यदि। विभाषा साकांक्षे। परोक्षे लिट्। हशश्वतोर्लङ् च। प्रश्ने चासन्नकाले।
लट् स्मे। अपरोक्षे च। ननौ पृष्टप्रतिवचने। नन्वोर्विभाषा। पुरि लुङ् चास्मे। वर्तमाने
लट्। लटः शतृशानचावप्रथमासमानाधिकरणे। संबोधने च। लक्षणहेत्वोः क्रियायाः।
तौ सत्। पूङ्यजोः शानन्। ताच्छील्यवयोवचनशक्तिषु चानश्। इङ्धार्योः शत्रकृ-

ष्णि णि । द्विषो ऽ मित्रे । सुञो यज्ञसंयोगे । अर्हः प्रशंसायां । आक्वेस्तच्छील तद्धर्म
तत्साधुकारिषु । तृन् । अलंकृञ् निराकृञ् प्रजनोत्सचोत्पतोन्मदरुच्यपत्रप
वृतुवृधुसहचर इष्णुच् । णेश्छंदसि । भुवश्च । ग्लाजिस्थश्च ग्स्नुः । त्रसिगृधिधृ
षिक्षिपेः क्नुः । शमित्यष्टाभ्यो घिनुण् । संपृचानुरुधाङ्यमाङ्यसपरिसृसंसृजप
रिदेविसंज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुहयुजा
क्रीडविविचत्यजरजभजातिचरापचरामुषाभ्याहनश्च । वौ कषलसकत्थ
स्रंभः । अपे चलषः । प्रे लपसृद्रुमथवदवसः । निन्दहिंसक्लिशखादविनाश
परिक्षिपपरिरटपरिवादिव्याभाषासूयो वुञ् । देविक्रुशोश्चोपसर्गे । चलन
शब्दार्थादकर्मकाद्युच् । अनुदात्तेतश्च हलादेः । जुचंक्रम्यदंद्रम्यसृगृधिज्व
लशुचलषपतपदः । क्रुधमण्डार्थेभ्यश्च । न यः । सूददीपदीक्षश्च । लषपतपदस्था
भूवृषहनकमगमशृभ्य उकञ् । जल्पभिक्षकुट्टलुण्टवृङः षाकन् । प्रजोरि
निः । जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्च । स्पृहिगृहिपतिद

यिनिद्रातन्द्राश्रद्धाभ्य आलुच् । दाधेट्सिशदसदो रुः । सृघस्यदः क्मरच् भञ्जभासमिदो घुरच् । विदिभिदिच्छिदेः कुरच् । इणनशजिसर्तिभ्यः क्वरप् । गत्वरश्च । जागुरूकः । यजजपदशांयङः । नमिकम्पिस्म्यजसकमहिंसदीपो रः । सनाशंसभिक्षउः । विन्दुरिच्छुः । क्याच्छन्दसि । आदृगमहनजनः किकिनौ लिट्च । स्वपितृषोर्नजिङ् । शृवन्द्योरारुः । भियः क्रुक्लुकनौ । स्थेशभासपिसकसो वरच् । यश्च यङः । भ्राजभासधुर्विद्युतोर्जिपृजुग्रावस्तुवः क्विप् । अन्येभ्योऽपि दृश्यते । भुवः संज्ञान्तरयोः । विप्रसंभ्यो ड्वसंज्ञायां । धः कर्मणि ष्ट्रन् । दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे । हलसूकरयोः पुवः । अर्तिलूधूसूखनसहचर इत्रः । पुवः संज्ञायां । कर्तरि चर्षिदेवतयोः । ञीतः क्तः । मतिबुद्धिपूजार्थेभ्यश्च । कर्मणि द्वा पूः सस्तू बहुलमन्येषु नन्वोः । शाभिति भञ्जभासधः कर्मण्यक्षे । इति तृतीयाध्यायस्य द्वितीयपादः । उणादयो बहुलं । भूतेऽपि दृश्यन्ते । भविष्यति गम्यादयः । यावत्पुरानिपातयोर्लट् । विभाषा कदाकर्ह्योः ।

च्छु४

15

किंवृत्ते लिप्सायां। लिप्स्यमानसिद्धौ च। लोडर्थलक्षणे च। लिङ्चोर्ध्वमौहूर्तिके।
तुमुन्ण्वुलौ क्रियायां क्रियार्थायां। भाववचनाश्च। अण्कर्मणि च। लृट्शेषे च।
लृटः सद्वा। अनद्यतने लुट्। पदरुजविशस्पृशो घञ्। सृ स्थिरे। भावे। अकर्तरि
च कारके संज्ञायां। परिमाणाख्यायां सर्वेभ्यः। इङश्च। उपसर्गे रुवः। समियुद्रु
दुवः। श्रिणीभुवोनुपसर्गे। वौ क्षुश्रुवः। अवोदोर्नियः। प्रे द्रुस्तुस्रुवः। निरभ्योः
पूल्वोः। उन्न्योर्ग्रः। कृ धान्ये। यज्ञे समि स्तुवः। प्रे स्त्रोऽयज्ञे। प्रथने वावशब्दे। छंदो
नाम्नि च। उदि ग्रहः। समि मुष्टौ। परिन्योर्नीणोर्द्यूताभ्रेषयोः। परावनुपात्यय इ
णः। व्युपयोः शेतेः पर्याये। हस्तादाने चेरस्तेये। निवासचितिशरीरोपसमा
धानेष्वादेश्च कः। संघे चानौत्तराधर्ये। कर्मव्यतिहारे णच् स्त्रियां। अभिवि
धौ भाव इनुण्। आक्रोशे वन्योर्ग्रहः। प्रे लिप्सायां। परौ यज्ञे। नौ वृ धान्ये। उदि श्र
यतियौतिपूद्रुवः। विभाषाङि रुप्लुवोः। अवे ग्रहो वर्षप्रतिबंधे। प्रे वणिजां। र
श्मौ च। वृणोतेराच्छादने। परौ भुवोऽवज्ञाने। एरच्। ऋदोरप्। ग्रहवृदृनिश्चिग

मश्च। उपसर्गेऽदः। नौ ण च। व्यधजपोरनुपसर्गे। स्वनहसोर्वा। यमः समुपनिवि
षु च। नौ गदनदपठस्वनः। क्वणो वीणायां च। नित्यं पणः परिमाणे। मदोऽनुप
सर्गे। प्रमदसंमदौ हर्षे। समुदोरजः पशुषु। अक्षेषु ग्लहः। प्रजने सर्तेः। ह्वः संप्रसारणं
च न्यभ्युपविषु। आङि युद्धे। निपानमाहावः। भावेऽनुसर्गस्य। हनश्च वधः। मूर्तौ घनः।
अंतर्घनो देशे। अगारैकदेशे प्रघणः प्रघाणश्च। उद्घनोऽत्याधानं। अपघनोऽंगं। कर
णेऽयोविद्रुषु। स्तंबे क च। परौ घः। उपघ्न आश्रये। संघोद्घौ गणप्रशंसयोः। निघो नि
मित्तं। ड्वितः क्त्रिः। ट्वितोऽथुच्। यजयाचयतविछप्रछरक्षो नङ्। स्वपो नन्। उपसर्गे घोः
किः। कर्मण्यधिकरणे च। स्त्रियां क्तिन्। स्थागापापचो भावे। मंत्रे वृषेषपचमनवि
दभूवीरा उदात्तः। ऊतियूतिजूतिसातिहेतिकीर्तयश्च। व्रजयजोर्भावे क्यप्। संज्ञायां
समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः। कृञः श च। इच्छा। अप्रत्ययात्। गु
रोश्च हलः। षिद्भिदादिभ्योऽङ्। चिंतिपूजिकथिकुंबिचर्चश्च। आतश्चोपसर्गे। ण्यास
श्रंथो युच्। रोगाख्यायां ण्वुल्बहुलं। संज्ञायां। विभाषाख्यानपरिप्रश्नयोरिञ्च। प

र्यायार्हणोत्पत्तिषुण्वुच्। आक्रोशे नञ्यनिः। कृत्यल्युटो बहुलं। [ग१] पुंसि संज्ञायां घः प्रायेण। ल्युट् च। कर्मणि च येन संस्पर्शात्कर्तुः शरीरसुखं। करणाधिकरणयोश्च। पुंसि संज्ञायां घः प्रायेण।
गोचरसंचरवहव्रजव्यजापणनिगमाश्च। अवे तृस्त्रोर्घञ्। हलश्च। अध्यायन्यायो
द्यावसंहाराधारावायाश्च। उदंकोनुदके। जालमानायः। खनो घ च। ईषदुःसुषु कृच्छ्राकृ
च्छ्रार्थेषु खल्। कर्तृकर्मणोश्च भूकृञोः। आतो युच्। छंदसि गत्यर्थेभ्यः। अन्येभ्योपि दृश्य
ते। वर्तमानसामीप्ये वर्तमानवद्वा। आशंसायां भूतवच्च। क्षिप्रवचने लृट्। आशंसाव
चने लिङ्। नानद्यतनवत्क्रियाप्रबंधसामीप्ययोः। भविष्यति मर्यादावचनेवरस्मिन्।
कालविभागे चानहोरात्राणां। परस्मिन्विभाषा। लिङ्निमित्ते लृङ् क्रियातिपत्तौ। भूते च।
वोताप्योः। गर्हायां लडपिजात्वोः। विभाषा कथमि लिङ् च। किंवृत्ते लिङ्लृटौ। अनवक्लृ
प्त्यमर्षयोरकिंवृत्तेपि। किंकिलास्त्यर्थेषु लृट्। जातुयदोर्लिङ्। यच्चयत्रयोः। गर्हायां च।
चित्रीकरणे च। शेषे लृडयदौ। उताप्योः समर्थयोर्लिङ्। कामप्रवेदनेकच्चिति। संभाव
नेलमिति चेत्सिद्धाप्रयोगे। विभाषा धातौ संभावनवचनेयदि। हेतुहेतुमतोर्लिङ्। इच्छा

र्थेषु लिङ्लोटौ। समानकर्तृकेषु तुमुन्। लिङ् च। इच्छार्थेभ्यो विभाषा वर्तमाने। विधिनिमं
त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्। लोट् च। प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च। लि
ङ् चोर्ध्वमौहूर्तिके। स्मे लोट्। अधीष्टे च। कालसमयवेलासु तुमुन्। लिङ् यदि। अर्हे कृ
त्यतृचश्च। आवश्यकाधमर्ण्ययोर्णिनिः। कृत्याश्च। शकि लिङ् च। आशिषि लिङ्लोटौ। क्ति
च्क्तौ च संज्ञायां। माङि लुङ्। स्मोत्तरे लङ् च। ३ एञ्ञ निवासख्येधा पघनोंगमिच्छा तलश्च
वोताप्यार्विधिषोउश। इति तृतीयाध्यायस्य तृतीयः पादः। धातुसंबंधे प्रत्ययाः। क्रियास
मभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः। समुच्चयेन्यतरस्यां। यथाविध्यनुप्रयोगः
पूर्वस्मिन्। समुच्चये सामान्यवचनस्य। छंदसि लुङ्लङ्लिटः। लिङर्थे लेट्। उपसं
वादाशंकयोश्च। तुमर्थे सेसेनसेअसेन्क्सेकसेनध्यैअध्यैन्कध्यैन्शध्यैशध्यैन्तवे
तवेङ्तवेनः। प्रयै रोहिष्यै अव्यथिष्यै। दृशे विख्ये च। शकि णमुल्कमुलौ। ईश्वरे तोसु
न्कसुनौ। कृत्यार्थे तवैकेन्केन्यत्वनः। अवचक्षे च। भावलक्षणे स्थेणकृञ्वदिचरिहु
तमिजनिभ्यस्तोसुन्। सृपितृदोः कसुन्। अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा। उदीचां
माङो व्यतीहारे। परावरयोगे च। समानकर्तृकयोः पूर्वकाले। आभीक्ष्ण्ये णमुल् च। न

पघनाकांक्षे। विभाषाग्रेप्रथमपूर्वेषु। कर्मण्याक्रोशे कृञः खमुञ्। स्वादुमि णमुल्
। अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत्। यथातथयोरसूयाप्रतिवचने। कर्मणि
दृशिविदोः साकल्ये। यावति विंदजीवोः। चर्मोदरयोः पूरेः। वर्षप्रमाण ऊलोपश्चास्या
न्यतरस्यां। चेले क्नोपेः। निमूलसमूलयोः कषः। शुष्कचूर्णरूक्षेषु पिषः। समूलाकृत
जीवेषु हन्कृञ्ग्रहः। करणे हनः। स्नेहने पिषः। हस्ते वर्तिग्रहोः। स्वे पुषः। अधिकरणे
बंधः। संज्ञायां। कर्त्रोर्जीवपुरुषयोर्नशिवहोः। ऊर्ध्वे शुषिपूरोः। उपमाने कर्मणि च।
कषादिषु यथाविध्यनुप्रयोगः। उपदंशस्तृतीयायां। हिंसार्थानां च समानकर्मका
णां। सप्तम्यां चोपपीडरुधकर्षः। समासत्तौ। प्रमाणे च। अपादाने परीप्सायां। द्वि
तीयायां च। स्वांगेऽध्रुवे। परिक्लिश्यमाने च। विशिपतिपदिस्कंदां व्याप्यमानासेव्यमा
नयोः। अस्यतितृषोः क्रियांतरे कालेषु। नाम्न्यादिशिग्रहोः। अव्ययेऽयथाभिप्रेताख्या
ने कृञः क्त्वाणमुलौ। तिर्यच्यपवर्गे। स्वांगे तस्प्रत्यये कृभ्वोः। नाधार्थप्रत्यये च्व्यर्थे। तू
ष्णीमि भुवः। अन्वच्यानुलोम्ये। शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन्।

पर्यासिवचनेष्वलमर्थेषु। कर्तरि कृत्। भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्या
पात्या वा। लः कर्मणि भावे चाकर्मकेभ्यः। तयोरेव कृत्यक्तखलर्थाः। आदिकर्मणि क्तः
कर्तरि। गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च। दाशगोघ्नौ सं
प्रदाने। भीमादयोपादाने। ताभ्यामन्यत्रोणादयः। क्तोधिकरणे च ध्रौव्यगतिप्रत्यव
सानार्थेभ्यः। लस्य। तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिम
हिङ्। टित आत्मनेपदानां टेरे। थासः से। लिटस्तझयोरेशिरेच्। परस्मैपदानां णलतुसु
स्थलथुसणल्वमाः। विदो लटो वा। ब्रुवः पंचानामादित आहो ब्रुवः। लोटो लङ्वत्। एरुः।
सेर्ह्यपिच्च। वा छंदसि। मेर्निः। आमेतः। सवाभ्यां वामौ। आडुत्तमस्य पिच्च। एत ऐ। ले
टोडाटौ। आत ऐ। वैतोन्यत्र। इतश्च लोपः परस्मैपदेषु। स उत्तमस्य। नित्यं ङितः। इतश्च।
तस्थस्थमिपां तांतंतामः। लिङः सीयुट्। यासुट् परस्मैपदेषूदात्तो ङिच्च। किदाशिषि। झ
स्य रन्। इटोत्। सुट् तिथोः। झेर्जुस्। सिजभ्यस्तविदिभ्यश्च। आतः। लङः शाकटायनस्यै
व। द्विषश्च। तिङ्शित्सार्वधातुकं। आर्धधातुकं शेषः। लिट् च। लिङाशिषि। छंदस्यु

मयथा। धातुसमानाधिकरणेस्वांगे लिटस्तस्थस्थमिपांसस्सदशा। इति तृतीयाध्यायस्य
चतुर्थः पादः। समाप्तश्चाध्यायः। ङ्याप्प्रातिपदिकात्। स्वौजसमौट्छष्टाभ्यांभिस्ङेभ्यांभ्य
स्ङसिभ्यांभ्यस्ङसोसांङ्योस्सुप्। स्त्रियां। अजाद्यतष्टाप्। ऋन्नेभ्योङीप्। उगितश्च।
वनोरच। पादोन्यतरस्यां। टाबृचि। नषट्स्वस्रादिभ्यः। मनः। अनोबहुव्रीहेः। डाबुभाभ्या
मन्यतरस्यां। अनुपसर्जनात्। टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्व
रख्युनां। यञश्च। प्राचांष्फतद्धितः। सर्वत्रलोहितादिकतंतेभ्यः। कौरव्यमांडूकाभ्यांच। वय
सिप्रथमे। द्विगोः। अपरिमाणबिस्ताचितकंबल्येभ्योनतद्धितलुकि। काण्डांतात्क्षेत्रे। पुरुषा
त्प्रमाणेन्यतरस्यां। बहुव्रीहेरूधसोङीष्। संख्याव्ययादेर्ङीप्। दामहायनांताच्च। अनउ
पधालोपिनोन्यतरस्यां। नित्यंसंज्ञाछंदसोः। केवलमामकभागधेयपापापरसमाना
र्यकृतसुमंगलभेषजाच्च। रात्रेश्चाजसौ। अंतर्वत्पतिवतोर्नुक्। पत्युर्नोयज्ञसंयोगे।
विभाषासपूर्वस्य। नित्यंसपत्न्यादिषु। पूतक्रतोरैच। वृषाकप्यग्निकुसितकुसिदाना
मुदात्तः। मनोरौवा। वर्णादनुदात्तात्तोपधात्तोनः। अन्यतोङीष्। षिद्गौरादिभ्यश्च। जानप
दकुंडगोणस्थलभाजनागकालनीलकुशकामुककबराद्वृत्त्यमत्रावपनाकृत्रिमाश्रा

ण्यस्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु। शोणात्प्राचां। वोतो गुणव-
चनात्। बह्वादिभ्यश्च। नित्यं छन्दसि। भुवश्च। पुंयोगादाख्यायां। इंद्रवरुणभवशर्वरु-
द्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक्। क्रीतात्करणपूर्वात्। क्तादल्पाख्या-
यां। बहुव्रीहेश्चान्तोदात्तात्। अस्वांगपूर्वपदाद्वा। स्वांगाच्चोपसर्जनादसंयोगोपधात्।
नासिकोदरौष्ठजंघादंतकर्णशृंगाच्च। नक्रोदिबह्वचः। सहनञ्विद्यमानपूर्वाच्च। न-
खमुखात्संज्ञायां। दीर्घजिह्वी च छन्दसि। दिक्पूर्वपदान्ङीप्। वाहः। सख्यशिश्वीति
भाषायां। जातेरस्त्रीविषयादयोपधात्। पाककर्णपर्णपुष्पफलमूलवालोत्तरपदा-
च्च। इतो मनुष्यजातेः। ऊङुतः। बाह्वंतात्संज्ञायां। पंगोश्च। ऊरूत्तरपदादौपम्ये। संहि-
तशफलक्षणवामादेश्च। कद्रुकमण्डल्वोश्छन्दसि। संज्ञायां। शार्ङ्गरवाद्यञोङीन्। यङ-
श्चाप्। आवट्याच्च। तद्धिताः। यूनस्तिः। अणिञोरनार्षयोर्गुरूपोत्तमयोःष्य-
ङ्गोत्रे। गोत्रावयवात्। क्रोड्यादिभ्यश्च। दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेवि-
द्धिभ्योन्यतरस्यां। समर्थानां प्रथमाद्वा। प्राग्दीव्यतोण्। अश्वपत्यादिभ्यश्च। दित्य-
दित्यादित्यपत्युत्तरपदाण्ण्यः। उत्सादिभ्योञ्। स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्। द्वि

गोर्लुगनपत्ये। गोत्रे लुगचि। यूनि लुक्। फक्फिञोरन्यतरस्यां। तस्यापत्यं।
एको गोत्रे। गोत्राद्यून्यस्त्रियां। अत इञ्। बाह्वादिभ्यश्च। सुधातुरकङ् च। गो
त्रे कुंजादिभ्यश्च्फञ्। नडादिभ्यः फक्। हरितादिभ्योऽञः। यञिञोश्च। शरद्वच्छु
नकदर्भाद्भृगुवत्साग्रायणेषु। द्रोणपर्वतजीवंतादन्यतरस्यां। अनृष्यानंत
र्ये विदादिभ्योऽञ्। गर्गादिभ्यो यञ्। मधुबभ्र्वोर्ब्राह्मणकौशिकयोः। कपिबोधादां
गिरसे। वतंडाच्च। लुक् स्त्रियां। अश्वादिभ्यः फञ्। भर्गात्त्रैगर्ते। शिवादिभ्योऽण्
। अवृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः। ऋष्यंधकवृष्णिकुरुभ्यश्च। मा
तुरुत्संख्यासंभद्रपूर्वायाः। कन्यायाः कनीन च। विकर्णशुंगच्छगलाद्वत्सभर
द्वाजात्रिषु। पीलाया वा। ढक् च मंडूकात्। स्त्रीभ्यो ढक्। द्व्यचः। इतश्चानिञः। शु
भ्रादिभ्यश्च। विकर्णकुषीतकात्काश्यपे। भ्रुवो वुक् च। कल्याण्यादीनामिनङ्
। कुलटाया वा। चटकाया ऐरक्। गोधाया ढ्रक्। आरगुदीचां। क्षुद्राभ्यो वा।
पितृष्वसुश्छण्। ढकि लोपः। मातृष्वसुश्च। चतुष्पाद्भ्यो ढञ्। गृष्ट्यादिभ्यश्च।

राजश्वशुराद्यत्। क्षत्राद्घः। कुलात्खः। अपूर्वपदादन्यतरस्यां यड्ढकञौ। महाकु
लादञ्खञौ। दुष्कुलाड्ढक्। स्वसुश्छः। भ्रातुर्व्यच्च। व्यन्सपत्ने। रेवत्यादिभ्यष्ठ
क्। गोत्रस्त्रियाः कुत्सने ण च। वृद्धाट्ठक्सौवीरेषु बहुलं। फेश्छ च। फांटाहृति
मिमताभ्यां णफिञौ। कुर्वादिभ्यो ण्यः। सेनांतलक्षणकारिभ्यश्च। उदीचामिञ्। ति
कादिभ्यः फिञ्। कौसल्यकार्मार्याभ्यां च। अणो द्व्यचः। उदीचां वृद्धादगोत्रात्। वा
किनादीनां कुक् च। पुत्रांतादन्यतरस्यां। प्राचामवृद्धात्फिन्बहुलं। मनोर्जातावञ्य
तौ षुक् च। अपत्यं पौत्रप्रभृति गोत्रं। जीवति तु वंश्ये युवा। भ्रातरि च ज्यायसि। वा
न्यस्मिन्सपिंडे स्थविरतरे जीवति। वृद्धस्य च पूजायां। यूनश्च कुत्सायां। जन
पदशब्दात्क्षत्रियादञ्। साल्वेयगांधारिभ्यां च। द्व्यञ्मगधकलिंगसूरमसादण्।
वृद्धेत्कोसलाजादाञ्ञ्यङ्। कुरुनादिभ्यो ण्यः। साल्वावयवप्रत्यग्रथकलकूटाश्म
कादिञ्। ते तद्राजाः। कंबोजाल्लुक्। स्त्रियामवंतिकुंतिकुरुभ्यश्च। अतश्च। न प्रा
च्यभर्गादियौधेयादिभ्यः। आब्दिगाः षिदाहोदेवयज्ञियञिञोर्वचामहाकुला

मनोर्जाताव ष्टादश । इति चतुर्थाध्यायस्य प्रथमः पादः । तेन रक्तं रागात् । लाक्षारोचनाश
कलकर्दमाट्ठक् । नक्षत्रेण युक्तः कालः । लुबविशेषे । संज्ञायां श्रवणाश्वत्थाभ्यां । द्वंद्वाच्छः । दृ
ष्टं साम । कलेर्ढक् । वामदेवाड्ड्यड्ड्यौ । परिवृतो रथः । पांडुकंबलादिनिः । द्वैपवैयाघ्रादञ् ।
कौमारापूर्ववचने । तत्रोद्धृतममत्रेभ्यः । स्थंडिलाच्छयितरि व्रते । संस्कृतं भक्षाः । शू
लोखाद्यत् । दध्नष्ठक् । उदश्वितोऽन्यतरस्यां । क्षीराड्ढञ् । सास्मिन्पौर्णमासीति संज्ञायां ।
कृ आग्रहायण्यश्वत्थाट्ठक् । विभाषा फाल्गुनीश्रवणाकार्तिकीचैत्रीभ्यः । सास्य देवता ।
कस्येत् । शुक्राद्घन् । अपोनप्त्रपांनप्तृभ्यां घः । छ च । महेंद्राद्घाणौ च । सोमाट्ट्यण् । वा
य्वृतुपित्रुषसो यत् । द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पतिगृहमे
धाच्छ च । अग्नेर्ढक् । कालेभ्यो भववत् । महाराजप्रोष्ठपदाट्ठञ् । पितृव्यमातुलमातामह
हपितामहाः । तस्य समूहः । भिक्षादिभ्योऽण् । गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्स
मनुष्याजाद्वुञ् । केदाराद्यञ् च । ठञ् कवचिनश्च । ब्राह्मणमाणववाडवाद्यन् । ग्रामजन
बंधुसहायेभ्यस्तल् । अनुदात्तादेरञ् । खंडिकादिभ्यश्च । चरणेभ्यो धर्मवत् । अचित्त

हस्तिधेनोष्ठक्। केशाश्वाभ्यां यञ्छावन्यतरस्यां। पाशादिभ्यो यः। खलगोरथात्।
इनित्रकट्यचश्च। विषयो देशे। राजन्यादिभ्यो वुञ्। भौरिक्याद्यैषुकार्यादिभ्यो वि
धल्भक्तलौ। सोऽस्यादिरिति छन्दसः प्रगाथेषु। संग्रामे प्रयोजनयोद्धृभ्यः। तदस्यां
प्रहरणमिति क्रीडायां णः। घञः साऽस्यां क्रियेति ञः। तदधीते तद्वेद। क्रतूक्थादि
सूत्रान्ताट्ठक्। क्रमादिभ्यो वुन्। अनुब्राह्मणादिनिः। वसन्तादिभ्यष्ठक्। प्रोक्ताल्लु
क्। सूत्राच्च कोपधात्। छन्दोब्राह्मणानि च तद्विषयाणि। तदस्मिन्नस्तीति देशे तन्
नाम्नि। तेन निर्वृत्तं। तस्य निवासः। अदूरभवश्च। ओरञ्। मतोश्च बह्वजङ्गा
त्। बह्वचः कूपेषु। उदक् च विपाशः। संकलादिभ्यश्च। स्त्रीषु सौवीरसाल्वप्राक्षु।
सुवास्त्वादिभ्योऽण्। रोणी। कोपधाच्च। वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फि
ञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृणप्रेक्षाश्मसखिसंकाशबलपक्ष
कर्णसुतंगमप्रगदिन्वराहकुमुदादिभ्यः। जनपदे लुप्। वरणादिभ्यश्च। शर्करा

यावा। ठक्छौ च। नद्यां मतुप्। मध्वादिभ्यश्च। कुमुदनडवेतसेभ्यो ड्मतुप्। नड
शादाड्ड्वलच्। शिखाया वलच्। उत्करादिभ्यश्छः। नडादीनां कुक् च। शेषे। राष्ट्रावा
रपाराद्घखौ। ग्रामाद्यखञौ। कत्त्र्यादिभ्यो ढकञ्। कुलकुक्षिग्रीवाभ्यः श्वास्यलं
कारेषु। नद्यादिभ्यो ढक्। दक्षिणापश्चात्पुरसस्त्यक्। कापिश्याः ष्फक्। रंकोरमनु
ष्ये ण् च। द्युप्रागपागुदक्प्रतीचो यत्। कन्थायाष्ठक्। वर्णौ वुक्। अव्ययात्त्यप्।
ऐषमोह्यःश्वसोऽन्यतरस्यां। तीररूप्योत्तरपदादञ्ञौ। दिक्पूर्वपदादसंज्ञायां ञः। म
द्रेभ्योऽञ्। उदीच्यग्रामाच्च बह्वचोऽन्तोदात्तात्। प्रस्थोत्तरपदपलद्यादिकोपधादण्
। कण्वादिभ्यो गोत्रे। इञश्च। न द्व्यचः प्राच्यभरतेषु। वृद्धाच्छः। भवतष्ठक्छ
सौ। काश्यादिभ्यष्ठञ्ञिठौ। वाहीकग्रामेभ्यश्च। विभाषोशीनरेषु। ओर्देशे ठञ्।
वृद्धात्प्राचां। धन्वयोपधाद्वुञ्। प्रस्थपुरवहान्ताच्च। रोपधेतोः प्राचां। जनपदत
दवध्योश्च। अवृद्धादपि बहुवचनविषयात्। कच्छाग्निवक्त्रगर्तोत्तरपदात्। ध

मादिभ्यश्च । नगरात्कुत्सनप्रावीण्ययोः । अरण्यान्मनुष्ये । विभाषाकुरुयुगंधराभ्यां । मद्रवृज्योः कन् । कोपधादण् । कच्छादिभ्यश्च । मनुष्यतत्स्थयोर्वुञ् । अपदातौ साल्वात् । गोयवाग्वोश्च । गर्तोत्तरपदाच्छः । गहादिभ्यश्च । प्राचां कटादेः । राज्ञः क च । वृद्धादकेकांतखोपधात् । कंथापलदनगरग्रामह्रदोत्तरपदात् । पर्वताच्च । विभाषामनुष्ये । कृकणपर्णाद्भारद्वाजे । तेन सास्मिन्नृठञ्कमादिभ्यः । जनपदेषु प्रागपाक्रन्वन्तृधात्स्यं च । इति तृतीयाध्यायस्य द्वितीयः पादः । युष्मदस्मदोरन्यतरस्यां खञ् च । तस्मिन्नणि च युष्माकास्माकौ । तवकममकावेकवचने । अर्धाद्यत् । परावराधमोत्तमपूर्वाच्च । दिक्पूर्वपदाट्ठञ् च । ग्रामजनपदैकदेशादञ्ठञौ । मध्यान्मः । अ सांप्रतिके । द्वीपादनुसमुद्रं यञ् । कालाट्ठञ् । श्राद्धे शरदः । विभाषा रोगातपयोः । निशाप्रदोषाभ्यां च । श्वसस्तुट् च । संधिवेलाद्यृतुनक्षत्रेभ्योऽण् । प्रावृष एण्यः ।

चतुर्थाद

(22)

वर्षाभ्यष्ठक्। छन्दसि ठञ्। वसन्ताच्च। हेमन्ताच्च। सर्वत्राण् च तलोपश्च।
सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च। विभाषा पूर्वाह्णापराह्णा
भ्याम्। तत्र जातः। प्रावृषष्ठप्। संज्ञायां शरदो वुञ्। पूर्वाह्णापराह्णार्द्राम्
लप्रदोषावस्कराद्वुन्। पथः पन्थ च। अमावास्याया वा। अ च। सिन्धुप
कराभ्यां कन्। अणञौ च। श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्व
सुहस्तविशाखाषाढाबहुलाल्लुक्। स्थानान्तगोशालखरशालाच्च।
वत्सशालाभिजिदश्वयुक्छतभिषजो वा। नक्षत्रेभ्यो बहुलम्। कृत
लब्धक्रीतकुशलाः। प्रायभवः। उपजानूपकर्णोपनीवेष्ठक्। संभूते
। कोशाड्ढञ्। कालात्साधुपुष्प्यत्पच्यमानेषु। उप्ते च। आश्वयुज्या वुञ्।
ग्रीष्मवसन्तादन्यतरस्याम्। देयमृणे। कलाप्यश्वत्थयवबुसाद्वुन्। ग्रीष्मा

वरसमाद्वुञ्। संवत्सराग्रहायणीभ्यां ठञ्च। व्याहरति मृगः। तदस्य
सोढं। तत्र भवः। दिगादिभ्यो यत्। शरीरावयवाच्च। दृतिकुक्षिकलशि
वस्त्यस्त्यहेर्ढञ्। ग्रीवाभ्योऽण्च। गंभीराञ्ञ्यः। अव्ययीभावाच्च। अंतःपूर्वप
दाट्ठञ्। ग्रामात्पर्यनुपूर्वात्। जिव्हामूलांगुलेश्छः। वर्गांताच्च। अशब्दे य
त्खावन्यतरस्यां। कर्णललाटात्कन्नलंकारे। तस्य व्याख्यान इति च व्याख्या
तव्यनाम्नः। बव्हचोंतोदात्ताट्ठञ्। क्रतुयज्ञेभ्यश्च। अध्यायेष्ववर्षेः। पौ
रोडाशपुरोडाशात्ष्ठन्। छंदसो यदणौ। द्व्यजृद्ब्राह्मणर्क्प्रथमाध्वरपुर
श्चरणनामाख्यातात्ठक्। अणृगयनादिभ्यः। तत आगतः। ठगायस्था
नेभ्यः। शुंडिकादिभ्योऽण्। विद्यायोनिसंबंधेभ्यो वुञ्। ऋतष्ठञ्। पितुर्य
च्च। गोत्रादंकवत्। हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः। मयट्च। प्रभवति। वि
दूराञ्ञ्यः। तद्गच्छति पथिदूतयोः। अभिनिष्क्रामति द्वारं। अधिकृत्य कृते ग्रं

(२८)

ये। शिण्डुकन्दयमसभद्वैद्वेद्रजनादिभ्यश्छः। सोऽस्य निवासः। अभिजन
श्च। आयुधजीविभ्यश्छः पर्वते। शंडिकादिभ्योञ्यः। सिंधुतक्षशिलादि
भ्योऽणञौ। तूदीशलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः। भक्तिः। अचि
त्तादेशकालाट्ठक्। महाराजाट्ठञ्। वासुदेवार्जुनाभ्यां वुन्। गोत्रक्षत्रि
याख्येभ्यो बहुलं वुञ्। जनपदिनां जनपदवत्सर्वं जनपदेन समानश
ब्दानां बहुवचने। तेन प्रोक्तं। तित्तिरवरतंतुखंडिकोखाच्छण्। काश्य
पकौशिकाभ्यामृषिभ्यां णिनिः। कलापिवैशंपायनांतेवासिभ्यश्च। पुरा
णप्रोक्तेषु ब्राह्मणकल्पेषु। शौनकादिभ्यश्छंदसि। कठचरकाल्लुक्। क
लापिनोऽण्। छगलिनो ढिनुक्। पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः।
कर्मंदकृशाश्वादिनिः। तेनैकदिक्। तसिश्च। उरसो यच्च। उपज्ञाते। कृते ग्रंथे।
संज्ञायां। कुलालादिभ्यो वुञ्। क्षुद्राभ्रमरवटरपादपादञ्। तस्येदं। रथाद्यत्।

पत्रपूर्वादञ्। पत्राध्वर्युपरिषदश्च। हलसीराट्ठक्। द्वंद्वाद्वुन्वैरमैथुनि
कयोः। गोत्रचरणाद्वुञ्। संघांकलक्षणेष्वञ्यञिञामण्। शाकलाद्वा।
छंदोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः। न दंडमाणवांतेवासिषु। रैवति
कादिभ्यश्छः। कौपिंजलहास्तिपदादण्। आथर्वणिकस्येकलोपश्च। तस्य
विकारः। अवयवे च प्राण्योषधिवृक्षेभ्यः। बिल्वादिभ्योऽण्। कोपधाच्च।
त्रपुजतुनोः षुक्। ओरञ्। अनुदात्तादेश्च। पलाशादिभ्यो वा। शम्याः ष्ट्ल
ञ्। मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः। नित्यं वृद्धशरादिभ्यः। गोश्च
पुरीषे। पिष्टाच्च। संज्ञायां कन्। व्रीहेः पुरोडाशे। असंज्ञायां तिलयवाभ्यां
। द्व्यचश्छंदसि। नोत्वद्वर्ध्रबिल्वात्। क्रीतवत्परिमाणात्। उष्ट्राद्वुञ्। उमो
र्णयोर्वा। एण्या ढञ्। गोपयसोर्यत्। द्रोश्च। माने वयः। फले लुक्। प्लक्षादि
भ्योऽण्। जंब्वा वा। लुप्च। हरीतक्यादिभ्यश्च। कंसीयपरशव्ययोर्यञञौ लुक्च।

युष्मद्वेमं तात्सम्भृतेग्रा माद्वितुने नरथात्पलाशादिभ्यो द्रोश्चाशे। इति चतुर्थाध्यायस्य तृ
तीयः पादः। प्राग्वहतेष्ठक्। तेन दीव्यति खनति जयति जितं। संस्कृतं। कुलत्थकोपधाद
ण्। तरति। गोपुच्छाट्ठञ्। नौद्व्यचष्ठन्। चरति। आकर्षात्ष्ठन्। श्वगणाट्ठञ्च। वेतनादिभ्यो
जीवति। वस्नक्रयविक्रयाट्ठन्। आयुधाच्छ च। हरत्युत्संगादिभ्यः। भस्त्रादिभ्यष्ठन्। विभा
षा विवधवीवधात्। अण्कुटिलिकायाः। निर्वृत्तेऽक्षद्यूतादिभ्यः। क्त्रेर्मम्नित्यं। अपमित्यया
चिताभ्यां कक्कनौ। संसृष्टे। चूर्णादिनिः। लवणाल्लुक्। मुद्गादण्। व्यंजनैरुपसिक्ते। ओ
जःसहोम्भसा वर्त्तते। तत्प्रत्यनुपूर्वमीपलोमकूलं। परिमुखं च। प्रयच्छति गर्ह्यं। कुसीदद
शैकादशात्ष्ठन्ष्ठचौ। उञ्छति। रक्षति। शब्ददर्दुरं करोति। पक्षिमत्स्यमृगान्हन्ति। परिपंथं
च तिष्ठति। माथोत्तरपदपदव्यनुपदं धावति। आक्रन्दाट्ठञ्च। पदोत्तरपदं गृह्णाति। प्र
तिकंठार्थललामं च। धर्मं चरति। प्रतिपथमेति ठंश्च। समवायान्समवैति। परिषदो ण्यः।
सेनाया वा। संज्ञायां ललाटकुक्कुट्यौ पश्यति। तस्य धर्म्यं। अण्महिष्यादिभ्यः। ऋतोऽञ्।
अवक्रयः। तदस्य पण्यं। लवणाट्ठञ्। किशरादिभ्यष्ठन्। शलालुनोऽन्यतरस्यां। शिल्पं।

मड्डुकझर्झरादणन्यतरस्यां। प्रहरणं। परश्वधाट्ठञ्च। शक्तियष्ट्योरीकक्। अस्तिनास्ति
दिष्टं मतिः। शीलं। छत्रादिभ्यो णः। कर्माध्ययने वृत्तं। बह्वच्पूर्वपदाट्ठच्। हितं भक्षाः। त
दस्मै दीयते नियुक्तं। श्राणामांसौदनाट्टिठन्। भक्तादणन्यतरस्यां। तत्र नियुक्तः। अ
गारान्ताट्ठन्। अध्यायिन्यदेशकालात्। कठिनान्तप्रस्तारसंस्थानेषु व्यवहरति। निकटे
वसति। आवसथात्ष्ठल्। प्राग्घिताद्यत्। तद्वहति रथयुगप्रासंगं। धुरो यड्ढकौ। खः सर्वधु
रात्। एकधुराल्लुक्च। शकटादण्। हलसीराट्ठक्। संज्ञायां जन्याः। विध्यत्यधनुषा। धनग
णं लब्धा। अन्नाण्णः। वशं गतः। पदमस्मिन्दृश्यं। मूलमस्याबर्हि। संज्ञायां धेनुष्या। गृहपति
ना संयुक्ते ञ्यः। नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमस
मितसंमितेषु। धर्मपथ्यर्थन्यायादनपेते। छन्दसो निर्मिते। उरसोऽण्च। हृदयस्य प्रियः। बं
धने चर्षौ। मतजनहलात्करणजल्पकर्षेषु। तत्र साधुः। प्रतिजनादिभ्यः खञ्। भक्ता
ण्णः। परिषदो ण्यः। कथादिभ्यष्ठक्। गुडादिभ्यष्ठञ्। पथ्यतिथिवसतिस्वपतेर्ढञ्। स
भाया यः। ढश्छन्दसि। समानतीर्थे वासी। समानोदरे शयित ओ चोदात्तः। सोदराद्यः।
भवे छन्दसि। पाथोनदीभ्यां ड्यण्। वेशंतहिमवद्भ्यामण्। स्रोतसो विभाषा ड्यड्ड्यौ। स

28

गर्भसयूथसनुताद्यत्। तुग्राद्घन्। अग्राद्यत्। घच्छौ च। समुद्राभ्राद्घः। बर्हिषि दत्तम्।
दूतस्य भागकर्मणी। रक्षोयातूनां हननी। रेवतीजगतीहविष्याभ्यः प्रशस्ये। असु
रस्य स्वं। मायायामण्। तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक् च मतोः। अश्वि
मानण्। वयस्यासु मूर्ध्नो मतुप्। मत्वर्थे मासतन्वोः। मधोर्ञ च। ओजसोऽहनि
यत्खौ। वेशोयशआदेर्भगाद्यल्। ख च। पूर्वैः कृतमिनयौ च। अद्भिः संस्कृतम्
। सहस्रेण संमितौ घः। मतौ च। सोममर्हति यः। मये च। मधोः वसोः समूहे च।
नक्षत्राद्घः। सर्वदेवात्तातिल्। शिवशमरिष्टस्य करे। भावे च। प्राग्वहतेरप
मिस्य धर्मशीलं हलपरिषदोर क्षा नक्षत्राच्छेत्वा रि। इति चतुर्थाध्यायस्य च
तुर्थः पादः। समाप्तश्चाध्यायः। प्राक्क्रीताच्छः। उगवादिभ्यो यत्। कंबलाच्च
संज्ञायां। विभाषा हविरपूपादिभ्यः। तस्मै हितं। शरीरावयवाद्यत्। खलयव
माषतिलवृषब्रह्मणश्च। अजाविभ्यां थ्यन्। आत्मन्विश्वजनभोगोत्तरप

दात्खः। सर्वपुरुषाभ्यां णढञौ। माणवचरकाभ्यां खञ्। तदर्थं विकृतेः प्रकृ
तौ। छदिरुपधिबलेर्ढञ्। ऋषभोपानहोर्ञ्यः। चर्मणोऽञ्। तदस्य तदस्मि
न्स्यादिति। परिखाया ढञ्। प्राग्वतष्ठञ्। अर्हाद गोपुच्छसंख्यापरिमा
णाट्ठक्। असमासे निष्कादिभ्यः। शताच्च ठन्यतावशते। संख्याया अति
शदन्तायाः कन्। वतोरिड्वा। विंशतित्रिंशद्भ्यां ड्वुन्नसंज्ञायां। कंसाट्टिठन्।
शूर्पादञन्यतरस्यां। शतमानविंशतिकसहस्रवसनादण्। अध्यर्द्धपूर्वद्वि
गोर्लुगसंज्ञायां। विभाषाकार्षापणसहस्राभ्यां। द्वित्रिपूर्वान्निष्कात्। बिस्ता
च्च। विंशतिकात्खः। खार्या ईकन्। पणपादमाषशताद्यत्। शाणाद्वा। द्वि
त्रिपूर्वादण्च। तेन क्रीतं। तस्य निमित्तं संयोगोत्पातौ। गोद्व्यचोसंख्याप
रिमाणाश्वादेर्यत्। पुत्राच्छ च। सर्वभूमिपृथिवीभ्यामणञौ। तस्येश्वरः।
तत्र विदित इति च। लोकसर्वलोकाट्ठञ्। तस्य वापः। पात्रात्ष्ठन्। तदस्मि

न्दध्यायलाभशुल्कोपदा दीयते। पूरणार्द्धाठ्ठन्। भागाद्यच्च। तद्धरति वहत्या
वहति भाराद्वंशादिभ्यः। वस्नद्रव्याभ्यां ठन्कनौ। संभवत्यवहरति पचति। आ
ढकाचितपात्रात्खोऽन्यतरस्यां। द्विगोष्ठंश्च। कुलिजाल्लुक्खौ च। सोऽस्यांश
वस्नभृतयः। तदस्य परिमाणं। संख्यायाः संज्ञासंघसूत्राध्ययनेषु। पंक्ति
विंशतित्रिंशच्चत्वारिंशत्पंचाशत्षष्टिसप्तत्यशीतिनवतिशतं। पंचद्द
शतौ वर्गे वा। सप्तनोऽञ्छंदसि। त्रिंशच्चत्वारिंशतोर्ब्राह्मणे संज्ञायां डण्।
तदर्हति। छिदादिभ्यो नित्यं। शीर्षछेदाद्यच्च। दंडादिभ्यो यः। छंदसि च। पा
त्राद्घंश्च। कडंगरदक्षिणाच्छ च। स्थालीबिलात्। यज्ञर्त्विग्भ्यां घखञौ
। पारायणतुरायणचांद्रायणं वर्त्तयति। संशयमापन्नः। योजनं गच्छ
ति। पथः ष्कन्। पंथो ण नित्यं। उत्तरपथेनाहृतं च। कालात्। तेन निर्वृ
त्तं। तमधीष्टो भृतो भूतो भावी। मासाद्वयसि यत्खञौ। द्विगोर्यप्। ष

णमासाण्यश्च । अवयसि ठंश्च । समायाः खः । द्विगोर्वा । रात्र्यहःसंव
त्सराच्च । वर्षाल्लुक् च । चित्तवति नित्यं । षष्टिकाः षष्टिरात्रेण पच्यंते
। वत्सरांताच्छश्छंदसि । संपरिपूर्वात्ख च । तेन परिजय्यलभ्यका
र्यसुकरं । तदस्य ब्रह्मचर्यम् । तस्य च दक्षिणा यज्ञाख्येभ्यः । तत्र च
दीयते कार्यं भववत् । व्युष्टादिभ्योऽण् । तेन यथाकथाचहस्ताभ्यां णय
तौ । संपादिनि । कर्मवेषाद्यत् । तस्मै प्रभवति संतापादिभ्यः । यो
गाद्यच्च । कर्मण उकञ् । समयस्तदस्य प्राप्तं । ऋतोरण् । छंदसि घस्
। कालाद्यत् । प्रकृष्टे ठञ् । प्रयोजनं । विशाखाषाढादण्मंथदंडयोः । अ
नुप्रवचनादिभ्यश्छः । समापनात्सपूर्वपदात् । ऐकागारिकट् चौरे ।
आकालिकडाद्यंतवचने । तेन तुल्यं क्रिया चेद्वतिः । तत्र तस्येव । तद
र्हम् । उपसर्गाच्छंदसि धात्वर्थे । तस्य भावस्त्वतलौ । आ च त्वात् । नञ्पूर्वा

त्पुरुषादचतुरसंगतलवणवढयुधकतरसलसेभ्यः।पृथ्वादिभ्यइ
मनिज्वा।वर्णदृढादिभ्यःष्यञ्च।गुणवचनब्राह्मणादिभ्यःकर्मणिच।
स्तेनाद्यन्नलोपश्च।सख्युर्यः।कपिज्ञात्योर्ढक्।पत्यंतपुरोहितादिभ्यो
यक्।प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ्।हायनांतयुवादिभ्यो
ऽण्।इगंताच्चलघुपूर्वात्।योपधाद्गुरूपोत्तमाद्वुञ्।द्वंद्वमनोज्ञादिभ्य
श्च।गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु।होत्राभ्यश्छः।ब्रह्मणस्त्वः।प्रा
क्रीताच्छतात्सर्वभूमिससनोऽग्मासात्तस्मैप्रभवतिननन्भूर्वाखोउश।
इतिपंचमाध्यायस्यप्रथमःपादः।धान्यानांभवनेक्षेत्रेखञ्।व्रीहि
शाल्योर्ढक्।यवयवकषष्टिकाद्यत्।विभाषातिलमाषोमाभंगाणु
भ्यः।सर्वचर्मणःकृतःखखञौ।यथामुखसंमुखस्यदर्शनःखः।तत्स

र्वादेः पथ्यंगकर्मपत्रपात्रं व्याप्नोति। आप्रपदं प्राप्नोति। अनुपदसर्वान्नायान
यं बद्धा भक्षयति नेयेषु। परोवरपरंपरपुत्रपौत्रमनुभवति। अवारपारात्यंता
नुकामं गामी। समांसमां विजायते। अद्यश्वीनावष्टब्धे। आगवीनः। अनुग्वलंगा
मी। अध्वनो यत्खौ। अभ्यमित्राच्छ च। गोष्ठात्खञ् भूतपूर्वे। अश्वस्यैकाहग
मः। शालीनकौपीने अधृष्टाकार्ययोः। व्रातेन जीवति। साप्तपदीनं सख्यं। हैयंगवी
नं संज्ञायां। तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ। पक्षात्तिः। तेन वित्त
श्चुञ्चुप्चणपौ। विनञ्भ्यां नानाञौ नसह। वेः शालच्छंकटचौ। संप्रोदश्च कटच्।
अवात्कुटारच्च। नते नासिकायाः संज्ञायां टीटञ्नाटज्भ्रटचः। नेर्बिडज्बिरीसचौ
। इनच्पिटच्चिकचि च। उपाधिभ्यां त्यकन्नासन्नारूढयोः। कर्मणि घटोऽठच्। तदस्य
संजातं तारकादिभ्य इतच्। प्रमाणे द्वयसज्दघ्नञ्मात्रचः। पुरुषहस्तिभ्यामण् च।
यत्तदेतेभ्यः परिमाणे वतुप्। किमिदंभ्यां वो घः। किमः संख्यापरिमाणे डति च॥
संख्याया अवयवे तयप्। द्वित्रिभ्यां तयस्यायज्वा। उभादुदात्तो नित्यं। तदस्मिन्नधि

कमितिदशांताड्डुः।शदंतविंशतेश्च।संख्यायागुणस्यनिमानेमयट्।तस्यपूरणे
डट्।नांतादसंख्यादेर्मट्।थट्च्छंदसि।षट्कतिपयचतुरांथुक्।बहुपूगगणसंघस्य
तिथुक्।वतोरिथुक्।द्वेस्तीयः।त्रेःसंप्रसारणंच।विंशत्यादिभ्यस्तमडन्यतरस्यां।नि
त्यंशतादिमासार्द्धमाससंवत्सराच्च।षष्ट्यादेश्चासंख्यादेः।मतौछःसूक्तसाम्नोः।अ
ध्यायानुवाकयोर्लुक्।विमुक्तादिभ्योण्।गोषदादिभ्योवुन्।तत्रकुशलःपथः।आकर्षा
दिभ्यःकन्।धनहिरण्यात्कामे।स्वांगेभ्यःप्रसिते।उदराट्ठगाद्यूने।सस्येनपरिजातः।
अंशंहारी।तंत्रादचिरापहृते।ब्राह्मणकोष्णिकेसंज्ञायां।शीतोष्णाभ्यांकारिणि।
अधिकं।अनुकाभिकाभीकःकमिता।पार्श्वेनान्विच्छति।अयःशूलदंडाजिना
भ्यांठकठञौ।तावतिथंग्रहणमितिलुग्वा।सएषांग्रामणीः।शृंखलमस्यबंधनंकर
।उत्कउन्मनाः।कालप्रयोजनाद्रोगे।तदस्मिन्नन्नंप्रायेसंज्ञायां।कुल्माषादञ्।
श्रोत्रियंश्छंदोधीते।श्राद्धमनेनभुक्तमिनिठनौ।पूर्वादिनिः।सपूर्वाच्च।इष्टादि
भ्यश्च।छंदसिपरिपंथिपरिपरिणौपर्यवस्थातरि।अनुपद्यन्वेष्टा।साक्षाद्द्रष्ट

रिसंज्ञायां।क्षेत्रियच्परक्षेत्रेचिकित्स्यः।इंद्रियमिंद्रसृष्टमिंद्रजुष्टमिंद्रदत्तमि
ति वा।तदस्यास्त्यस्मिन्निति मतुप्।रसादिभ्यश्च।प्राणिस्थादातो लजन्यतरस्यां।सि
ध्मादिभ्यश्च।वत्सांसाभ्यां कामबले।फेनादिलच्च।लोमादिपामादिपिच्छादिभ्यः श
नेलचः।प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः।तपःसहस्राभ्यां विनीनी।अण् च।सिकताशर्करा
भ्यां च।देशे लुबिलचौ च।दंतउन्नतउरच्।ऊषसुषिमुष्कमधो रः।द्युद्रुभ्यां मः।केशा
द्वोन्यतरस्यां।गांड्यजगात्संज्ञायां।कांडांडादीरन्नीरचौ।रजःकृष्यासुतिपरिषदो व
लच्।दंतशिखात्संज्ञायां।ज्योत्स्नातमिस्राशृंगिणोर्जस्विन्नूर्जस्वलगोमिन्मलिन
मलीमसाः।अत इनिठनौ।व्रीह्यादिभ्यश्च।तुंदादिभ्य इलच्च।एकगोपूर्वाट्ठञ् नित्यं।
शतसहस्रांताच्च निष्कात्।रूपादाहतप्रशंसयोर्यप्।अस्मायामेधास्रजो विनिः।
बहुलछंदसि।ऊर्णाया युस्।वाचो ग्मिनिः।आलजाटचौ बहुभाषिणि।स्वामिन्नै
श्वर्ये।अर्शआदिभ्योच्।द्वंद्वोपतापगर्ह्यात्प्राणिस्थादिनिः।वातातीसाराभ्यां कु
क् च।वयसि पूरणात्।सुखादिभ्यश्च।धर्मशीलवर्णांताच्च।हस्ताज्जातौ।वर्णाद्ब्रह्म

–चारिणि।पुष्करादिभ्यो देशे।बलादिभ्यो मतुबन्यतरस्यां।संज्ञायां मन्माभ्यां।कं
शंभ्यां बभयुस्तितुतयसः।तुंदिबलिवटेर्भः।अहंशुभमोर्युस्।धान्याजां व्रातेन कि
मोविमुक्तादिभ्यः कालप्रयोजनात्स्त्र ज्ञाश्रद्धा स्मा या विंशतिः।इति पंचमाध्या
यस्य द्वितीयः पादः।प्राग्दिशो विभक्तिः।किंसर्वनामबहुभ्योऽद्व्यादिभ्यः।इदम इश्
।एतेतौ रथोः।एतदोऽन्।सर्वस्य सोऽन्यतरस्यां दि।पंचम्यास्तसिल्।तसेश्च।पर्यभि
भ्यां च।सप्तम्यास्त्रल्।इदमो हः।किमोऽत्।वाह च छंदसि।इतराभ्योपि दृश्यते।सर्वै
कान्यकिंयत्तदः काले दा।इदमो र्हिल्।अधुना।दानीं च।तदो दा च।तयोर्दार्हिलौ
च छंदसि।अनद्यतने र्हिलन्यतरस्यां।सप्म्यः परुत्परार्यैषमः।परेद्यव्यद्यपूर्वे
द्युरन्येतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयोद्युरुत्तरेद्युः।प्रकारवचने थाल्।इ
दमस्थमुः।किमश्च।था हेतौ च छंदसि।दिक्छब्देभ्यः सप्तमीपंचमीप्रथमाभ्यो
दिग्देशकालेष्वस्तातिः।दक्षिणोत्तराभ्यामतसुच्।विभाषा परावराभ्यां।अंचेर्लु
क्।उपर्युपरिष्टात्।पश्चात्।पश्च पश्चा च छंदसि।उत्तराधरदक्षिणादातिः।एन

बन्यतरस्यामदूरेपंचम्याः। दक्षिणादाच्। आहिचदूरे। उत्तराच्च। पूर्वाधरावरा
णामसिपुरधवश्चैषां। अस्ताति च। विभाषावरस्य। संख्याया विधार्थे धा। अधि
करणविचालेच। एकाद्धो ध्यमुञन्यतरस्यां। द्वित्र्योश्च धमुञ्। एधाच्च। याप्ये
पाशप्। पूरणाद्भागे तीयादन्। प्रागेकादशभ्योछंदसि। षष्ठाष्टमाभ्यांञच। मा
नपश्वंगयोः कन्लुकौ च। एकादाकिनिच्चासहाये। भूतपूर्वेचरट्। षष्ठ्यारूप्य
च। अतिशायने तमबिष्ठनौ। तिङश्च। द्विवचनविभज्योपपदे तरबीयसुनौ।
अजादीगुणवचनादेव। तुश्छंदसि। प्रशस्यस्यश्रः। ज्यच। वृद्धस्यच। अंतिक
बाढयोर्नेदसाधौ। युवाल्पयोः कनन्यतरस्यां। विन्मतोर्लुक्। प्रशंसायांरूप
प्। ईषदसमाप्तौ कल्पब्देश्यदेशीयरः। विभाषासुपोबहुच्पुरस्तात्तु। प्रकारव
चने जातीयर्। प्रागिवात्कः। अव्ययसर्वनाम्नामकच् प्राक्टेः। कस्यचदः।
अज्ञाते। कुत्सिते। संज्ञायांकन्। अनुकंपायां। नीतौचतद्युक्तात्। बह्वचोमनु

ष्यनाम्नष्ठज्वा । घनिलचौ च । प्राचामुपादेरडज्वुचौ च । जातिनाम्नः कन् । अ
जिनांतस्योत्तरपदलोपश्च । ठाजादावूर्ध्वं द्वितीयादचः । शेवलसुपरिविशा
लवरुणार्यमादीनां तृतीयात् । अल्पे । ह्रस्वे । संज्ञायां कन् । कुटीशमीशुंडाभ्यो
रः । कुत्वाडुपच् । कासूगोणीभ्यां ष्टरच् । वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे । किंय
त्तदो र्निर्धारणे द्वयोरेकस्य डतरच् । वा बहूनां जातिपरिप्रश्ने डतमच् । एकाच्च
प्राचां । अवक्षेपणे कन् । इवे प्रतिकृतौ । संज्ञायां च । लुम्मनुष्ये । जीविकार्थे
चापण्ये । देवपथादिभ्यश्च । वस्तेर्ढञ् । शिलाया ढः । शाखादिभ्यो यः । द्रव्यं च
भव्ये । कुशाग्राच्छः । समासाच्च तद्विषयात् । शर्करादिभ्योऽण् । अंगुल्यादिभ्य
ष्ठक् । एकशालायाष्ठजन्यतरस्यां । कर्कलोहितादीकक् । प्रत्नपूर्वविश्वेमा
त्थाल् छंदसि । पूगाञ्ञ्योऽग्रामणीपूर्वात् । व्रातच्फञोरस्त्रियां । आयुधजीवि
संघाञ्ञ्यड्वाहीकेष्वब्राह्मणराजन्यात् । वृकाट्टेण्यण् । दामन्यादित्रिगर्त्तषष्ठा
च्छः । पर्श्वादियौधेयादिभ्यामणञौ । अभिजिद्विदभृच्छालावच्छिखावच्छमीव

दूर्णावच्छ्रुमदणो यञ्। ञ्यादयस्तद्राजाः। प्राग्दिशो न यत तने विभाषाञ्यचजा
तिनोर्मात्रावत्सरे कोनविंशतिः। इति पंचमाध्यायस्य तृतीयः पादः। पादशतस्य ३२
संख्यादेर्वीप्सायां वुन्लोपश्च। दंड्व्यवसर्गयोश्च। स्थूलादिभ्यः प्रकारवचने कन्
। अनंतसंगतोक्तात्। न सामिवचने। बृहत्सा आछादने। अषडक्षाशितंग्वलंकर्मालं
पुरुषाध्युत्तरपदात्खः। विभाषांचेरदिक्स्त्रियां। जात्यांतात्छ बंधुनि। स्थानांताद्विभा
षा सस्थानेनेति चेत्। किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे। अमु च छंदसि। अनु
गादिनष्ठक्। णचस्त्रियामञ्। अणिनुणः। विसारिणो मत्स्ये। संख्यायाः क्रिया
भ्यावृत्तिगणने कृत्वसुच्। द्वित्रिचतुर्भ्यः सुच्। एकस्य सकृच्च। विभाषा बहोर्धावि
प्रकृष्टकाले। तत्प्रकृतवचने मयट्। समूहवच्च बहुषु। अनंतावसथेतिहभेषजाञ्
ञ्यः। देवतांतात्तादर्थ्ये यत्। पादार्घाभ्यां च। अतिथेर्ञ्यः। देवात्तल्। अवेः कः। यावादि
भ्यः कन्। लोहितान्मणौ। वर्णे चानित्ये। रक्ते। कालाच्च। विनयादिभ्यष्ठक्। वाचोव्या

ऋतार्थायां। तद्युक्तात्कर्मणोऽण्। ओषधेरजातौ। प्रज्ञादिभ्यश्च। मृदस्तिकन्। स
स्नौ प्रशंसायां। बृहत्यज्येष्ठाभ्यां तिल् तातिलौ च छंदसि। बह्वल्पार्थाच्छस्कारकाद
न्यतरस्यां। संख्यैकवचनाच्च वीप्सायां। प्रतियोगे पंचम्यास्तसिः। अपादाने चाही
यरुहोः। अतिग्रहाव्यथनक्षेपेष्वकर्तरि तृतीयायाः। हीयमानपापयोगाच्च। षष्ठ्या
व्याश्रये। रोगाच्चापनयने। अभूततद्भावे कृभ्वस्तियोगे संपद्यकर्तरि च्विः। अ
रुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च। विभाषा साति कार्त्स्न्ये। अभिवि
धौ संपदा च। तदधीनवचने। देये त्रा च। देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्विती
यासप्तम्योर्बहुलं। अव्यक्तानुकरणाद्द्व्यजवरार्धादनितौ डाच्। कृञो द्विती
यतृतीयशंबबीजात्कृषौ। संख्यायाश्च गुणान्तायाः। समयाच्च यापनायां।
सपत्रनिष्पत्रादतिव्यथने। निष्कुलान्निष्कोषणे। सुखप्रियादानुलोम्ये। दुःखा
त्प्रातिलोम्ये। शूलात्पाके। सत्यादशपथे। मद्रात्परिवापणे। समासान्ताः। न पूजनात्।

किमः क्षेपे। नञस्तपुरुषात्। पथो विभाषा। बहुव्रीहौ संख्येये डजबहुगणात्। ऋ
क्पूरब्धूःपथामानक्षे। अच्प्रत्यन्ववपूर्वात्सामलोम्नः। अक्ष्णोदर्शनात्। अच
तुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठी
वपदष्ठीवनक्तंदिवरात्रिंदिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्या
युषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः। ब्रह्महस्तिभ्यां वर्चसः। अ
वसमन्धेभ्यस्तमसः। श्वसो वसीयःश्रेयसः। अन्ववतप्ताद्रहसः। प्रतेरुरसः सप्त
मीस्थात्। अनुगवमायामे। द्विस्तावा त्रिस्तावा वेदिः। उपसर्गादध्वनः। तत्पुरु
षस्यांगुलेः संख्याव्ययादेः। अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः। अन्होन्ह
एतेभ्यः। न संख्यादेः समाहारे। उत्तमैकाभ्यां च। राजाहःसखिभ्यष्टच्। गोरत
द्धितलुकि। अग्राख्यायामुरसः। अनोश्मायःसरसां जातिसंज्ञयोः। ग्रामकौ
टाभ्यां च तक्ष्णः। अतेः शुनः। उपमानादप्राणिषु। उत्तरमृगपूर्वाच्च सक्थ्नः।

नावो द्विगोः। अर्द्धाच्च। खार्याः प्राचां। द्वित्रिभ्यामंजलेः। अनसंतान्नपुंसकाच्छंदसि
ब्रह्मणो जानपदाख्यायां। कुमहद्भ्यामन्यतरस्यां। द्वंद्वाच्चुदषहांतात्समाहारे। अव्ययी
भावे शरत्प्रभृतिभ्यः। अनश्च। नपुंसकादन्यतरस्यां। नदीपौर्णमास्याग्रहायणीभ्यः
। झयः। गिरेश्च सेनकस्य। बहुव्रीहौ सक्थ्यक्ष्णोः स्वांगात्षच्। अंगुलेर्दारुणि। द्वि
त्रिभ्यां ष मूर्ध्नः। अप्पूरणीप्रमाण्योः। अंतर्बहिर्भ्यां च लोम्नः। अञ्नासिकायाः सं
ज्ञायां नसं चास्थूलात्। उपसर्गाच्च। सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रैणीप
दाजपदप्रोष्ठपदाः। नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्यां। नित्यमसिच् प्रजाऽमे
धयोः। बहुप्रजाश्छंदसि। धर्म्मादनिच्केवलात्। जंभा सुहरिततृणसोमेभ्यः।
दक्षिणेर्मा लुब्धयोगे। इच्कर्म्मव्यतिहारे। द्विदंड्यादिभ्यश्च। प्रसंभ्यां जानुनोर्ज्ञुः।
ऊर्द्ध्वाद्विभाषा। ऊधसोऽनङ्। धनुषश्च। वा संज्ञायां। जायाया निङ्। गंधस्येदुत्पूति
सुसुरभिभ्यः। अल्पाख्यायां। उपमानाच्च। पादस्य लोपोऽहस्त्यादिभ्यः। कुं

शुद्ध २

भपदीषु च। संख्यासुपूर्वस्य। वयसि दंतस्य दतृ। छंदसि च। स्त्रियां संज्ञायां। विभा
षा श्यावारोकाभ्यां। अग्रांतशुभ्रवृषवराहेभ्यश्च। ककुदस्यावस्थायां लोपः। त्रिककु
त्पर्वते। उद्विभ्यां काकुदस्य। लोपः पूर्णाद्विभाषा। सुहृद्दुर्हृदौ मित्रामित्रयोः। उरःप्रभृ
तिभ्यः कप्। इनः स्त्रियां। नद्यृतश्च। शेषाद्विभाषा। न संज्ञायां। ईयसश्च। वंदिते भ्रातुः। अ
तश्छंदसि। नाडीतंत्र्योः स्वांगे। निष्प्रवाणिश्च। पादशतस्यतस्त्रकृतत्वकेज्यष्ठाभ्यां सप
त्रान्त्ववतत्सास्वार्यान्नेन्दुः सुभ्यां वयसि विंशति। इति पंचमाध्यायस्य चतुर्थः पादः। स
माप्तोऽध्यायः। एकाचो द्वे प्रथमस्य। अजादेर्द्वितीयस्य। नंद्राः संयोगादयः। पूर्वोऽभ्या
सः। उभे अभ्यस्तं। जक्षित्यादयः षट्। तुदादीर्घोऽभ्यासस्य। लिटि धातोरनभ्यासस्य। स
न्यङोः। श्लौ। चङि। दाश्वान्साह्वान्मीढ्वांश्च। ष्यङः संप्रसारणं पुत्रपत्योस्तत्पुरुषे। बंधु
नि बहुव्रीहौ। वचिस्वपियजादीनां किति। ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृ
च्छतिभृज्जतीनां ङिति च। लिट्यभ्यासस्योभयेषां। स्वापेश्चङि। स्वपिस्यमिव्येञां यङि
। न वशः। चायः की। स्फायः स्फी निष्ठायां। स्त्यः प्रपूर्वस्य। इद्वमूर्तिः स्पर्शयोः श्यः। प्रतेश्च।

विभाषाभ्यवपूर्वस्य। श्रृतं पाके। प्यायः पी। लिड्यङोश्च। विभाषाश्वेः। णौ च संश्चङोः।
ह्वः संप्रसारणं। अभ्यस्तस्य च। बहुलं छन्दसि। चायः की। अपस्पृधेथामानृचुरा
नृहुश्चिच्युषेतित्याजश्राताश्रितमाशीराशीर्त्तः। न संप्रसारणे संप्रसारणं। लिटि
वयो यः। वश्चास्यान्यतरस्यां किति। वेञः। ल्यपि च। ज्यश्च। व्यश्च। विभाषा परेः। आ
देच उपदेशेऽशिति। न व्यो लिटि। स्फुरतिस्फुलत्योर्घञि। क्रीङ्जीनां णौ। सिध्यतेर
पारलौकिके। मीनातिमिनोतिदीङां ल्यपि च। विभाषा लीयतेः। खिदेश्छन्दसि।
अपगुरो णमुलि। चिस्फुरोर्णौ। प्रजने वीयतेः। बिभेतेर्हेतुभये। नित्यं स्मयतेः। स
जिदृशोर्झल्यमकिति। अनुदात्तस्य चर्दुपधस्यान्यतरस्यां। शीर्षंश्छन्दसि। ये च तद्
धिते। अचि शीर्षः। पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छ
स्प्रभृतिषु। धात्वादेः षः सः। णो नः। लोपो व्योर्वलि। वेरपृक्तस्य। हल्ङ्याब्भ्यो दीर्घा
त्सुतिस्यपृक्तं हल्। एङ्ह्रस्वात्संबुद्धेः। सेश्छन्दसि बहुलं। ह्रस्वस्य पिति कृति तुक्।
संहितायां। छे च। आङ्माङोश्च। दीर्घात्। पदान्ताद्वा। इको यणचि। एचोऽयवा

यावः। वांतो यि प्रत्यये। धातोस्तन्निमित्तस्यैव। क्षय्यजय्यौ शक्यार्थे। क्रय्यस्तदर्थे
। भय्यप्रवय्ये च छंदसि। एकः पूर्वपरयोः। अंतादिवच्च। षत्वतुकोरसिद्धः। आद्गु
णः। वृद्धिरेचि। एत्येधत्यूठ्सु। आटश्च। उपसर्गादृति धातौ। वा सुप्यापिशलेः। ओ
तोम्शसोः। एङि पररूपं। ओमाङोश्च। उस्यपदांतात्। अतो गुणे। अव्यक्तानुक
रणस्यात इतौ। नाम्रेडितस्यांत्यस्य तु वा। नित्यमाम्रेडिते डाचि। अकः सवर्णे दीर्घः
। प्रथमयोः पूर्वसवर्णः। तस्माच्छसो नः पुंसि। नादिचि। दीर्घाज्जसि च। वा छंदसि।
अमि पूर्वः। संप्रसारणाच्च। एङः पदांतादति। ङसिङसोश्च। ऋत उत्। ख्यत्यात्पर
स्य। अतो रोरप्लुतादप्लुते। हशि च। प्रकृत्यांतःपादमव्यपरे। अव्यादवद्यादवक्रमुरव्र
तायमवंत्ववस्युषु च। यजुष्युरः। आपोजुषाणोवृष्णोवर्षिष्ठेंबेंबालेंबिके पूर्वे। अं
ग इत्यादौ च। अनुदात्ते च कुधपरे। अवपथासि च। सर्वत्र विभाषा गोः। अवङ्
स्फोटायनस्य। इंद्रे च। प्लुतप्रगृह्या अचि नित्यं। आङोनुनासिकश्छंदसि। इकोसवर्णे
शाकल्यस्य ह्रस्वश्च। ऋत्यकः। अप्लुतवदुपस्थिते। ई३ चाक्रवर्मणस्य। दिवउत्।

३४

एतत्तदोः सुलोपोकोरनञ्समासे हलि। स्यश्छंदसि बहुलं। सोचि लोपे चेत्पाद
पूरणं। सुट्कात्पूर्वः। अडभ्यासव्यवायेपि। संपरिभ्यां करोतौ भूषणे। समवा
ये च। उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु। किरतौ लवने। हिंसायां प्रतेश्च। अ
पाच्चतुष्पाच्छकुनिष्वालेखने। कुस्तुंबुरूणि जातिः। अपरस्पराः क्रियासात
त्ये। गोष्पदं सेवितासेवितप्रमाणेषु। आस्पदं प्रतिष्ठायां। आश्चर्यमनित्ये। वर्च
स्केवस्करः। अपस्करो रथांगं। विष्किरः शकुनौ वा। ह्रस्वाच्चंद्रोत्तरपदे मंत्रे।
प्रतिष्कशश्च कशेः। प्रस्कण्वहरिश्चंद्रावृषी। मस्करमस्करिणौ वेणुपरिव्रा
जकयोः। कास्तीराजस्तुंदे नगरे। कारस्करो वृक्षः। पारस्करप्रभृतीनि च संज्ञा
यां। अनुदात्तं पदमेकवर्जं। कर्षात्वतो घञोंत उदात्तः। उंछादीनां च। अनुदा
त्तस्य च यत्रोदात्तलोपः। धातोः। चितः। तद्धितस्य। कितः। तिसृभ्यो जसः। च
तुरः शसि। सावेकाचस्तृतीयादिर्विभक्तिः। अंतोदात्तादुत्तरपदादन्यतरस्या
मनित्यसमासे। अंचेश्छंदस्यसर्वनामस्थानं। ऊडिदंपदाद्यप्पुम्रैद्युभ्यः। अ
ष्टनो दीर्घात्। शतुरनुमो नद्यजादी। उदात्तयणो हल्पूर्वात्। नोङ्धात्वोः। ह्रस्वनु

ध्या मतुप्। नामन्यतरस्यां। ङ्याश्छंदसि। षट्त्रिचतुर्भ्यो हलादिः। झल्यु
पोत्तमं। विभाषा भाषायां। न गोश्वन्साववर्णराडङ्क्रुङ्कृद्भ्यः। दिवो झल्। नृ
चान्यतरस्यां। तित्स्वरितं। तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनु
दात्तमन्हिङ्वोः। आदिः सिचोन्यतरस्यां। स्वपादिहिंसामच्यनिटि। अभ्य
स्तानामादिः। अनुदात्ते च। सर्वस्य सुपि। भीह्रीभृहुमदजनधनदरिद्रा
जागरां। प्रत्ययात्पूर्वं सेति। लिति। आदिर्णमुल्यन्यतरस्यां। मतोः पूर्वमा
त्संज्ञायां स्त्रियां। अंतोवत्याः। अचः कर्तृयकि। थलि च सेटीडंतो वा। ञ्नित्य
सादिर्नित्यं। आमंत्रितस्य च। पथिमथोः सर्वनामस्थाने। अंतश्च तवै यु
गपत्। क्षयो निवासे। जयः करणं। वृषादीनां च। संज्ञायामुपमानं। निष्ठा
च द्व्यजनात्। शुष्कधृष्टौ। आशितः कर्ता। रिक्ते विभाषा। जुष्टार्पिते च छंद
सि। नित्यं मंत्रे। युष्मदस्मदोर्ङसि। ङयि च। यतोनावः। ईड्वंदवृशंसदुहां
ण्यतः। विभाषा वेण्विंधानयोः। त्यागरागहासकुहश्वठक्रथानां। उपो

४४

तमेरिति।चञ्यन्यतरस्यां।मतोःपूर्वमात्संज्ञायांस्त्रियां।अंतोवत्याः।ईवत्याः।चौ।
समासस्य।एकाचश्चापोऽन्यपिचयेचक्षय्यजय्याबकः।सवर्णेवपथाःसिंहिसा
यां।अनुदात्तस्यविभाषाक्षरेवसाखीणि।इतिषष्ठाध्यायस्यप्रथमःपादः।बहु
व्रीहौप्रकृत्यापूर्वपदं।तत्पुरुषेतुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः
।वर्णोवर्णेष्वनेते।गाधलवणयोः।प्रमाणेदायाद्यदायादे।प्रति।बंधिचिरकृ
घयोः।पदेपदेशे।निवातेवातत्राणे।शारदेनार्तवे।अध्वर्युकषाययोर्जातौ।
सदृशप्रतिरूपयोः।सादृश्ये।द्विगौप्रमाणे।गंतव्यपण्यंवाणिजे।मात्रोपज्ञोप
क्रमच्छायेनपुंसके।सुखप्रिययोर्हिते।प्रीतौच।स्वंस्वामिनि।पत्यावैश्वर्ये।
नभूवाक्चिद्दिधिषु।वाभुवनं।आशंकाबाधनेदीयःसुसंभावने।पूर्वेभूतपूर्वे
सविधसनीडसमर्यादसवेशसदेशेषुसामीप्ये।विस्पष्टादीनिगुणवचनेषु।अ
ज्याबमकन्यापवत्सुभावेकर्मधारये।कुमारश्च।आदिःप्रत्येनसि।पूगे
ष्वन्यतरस्यां।इगंतकालकपालभगालशरावेषुद्विगौ।बह्वन्यतरस्यां।

दिष्टिवितस्त्योश्च । सप्तमी सिद्धशुष्कपक्वबंधेष्वकालात् । परिप्रत्युपापाव
र्ज्यमानाहोरात्रावयवेषु । राजन्यबहुवचनद्वंद्वेंधकवृष्णिषु । संख्या । आचा
र्योपसर्जनश्चांतेवासी । कार्त्तकौजपादयश्च । महान्व्रीह्यपराह्णगृष्टीष्वासजा
बालभारभारतहैलिहिलरौरवप्रवृद्धेषु । क्षुल्लकश्च । वैश्वदेवे । उष्ट्रः सादिवा
म्योः । गौः सादसादिसारथिषु । कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढ
रूपापारेवडवातैतिलकद्रूःपण्यकंबलो दासीभाराणां च । चतुर्थी तदर्थे । अ
र्थे । क्ते च । कर्मधारयेऽनिष्ठा । अहीने द्वितीया । तृतीया कर्मणि । गतिरनंतरः ।
तादौ च निति कृत्यतौ । तवै चांतश्च युगपत् । अनिगंतोऽञ्चतौ वप्रत्यये ।
न्यधी च । ईषदन्यतरस्यां । हिरण्यपरिमाणं धने । प्रथमोऽचिरोपसंपत्तौ । कतर
कतमौ कर्मधारये । आर्यो ब्राह्मणकुमारयोः । राजा च । षष्ठी प्रत्येनसि । क्ते नि
त्यार्थे । ग्रामः शिल्पिनि । राजा च प्रशंसायां । आदिरुदात्तः । सप्तमी हारिणौ धर्म्ये
हरणे । युक्ते च । विभाषाध्यक्षे । पापं च शिल्पिनि । गोत्रांतेवासिमाणवब्राह्मणेषु

38

क्षेपे।अंगानि मैरेये।भक्ताख्यास्तदर्थेषु।गोडालसिंहसैंधवेषूपमाने।अकेजी
विकार्थे।प्राचांक्रीडायां।अणि नियुक्ते।शिल्पिनि चाकृञः।संज्ञायां च।गोतंति
यवं पाले।णिनि।उपमानं शब्दार्थप्रकृतावेव।युक्तारोह्यादयश्च।दीर्घकाशतुष
भ्राष्ट्रवटं जे।अंत्यात्पूर्वं बह्वचः।ग्रामेनिवसंतः।घोषादिषु च।छात्र्यादयः शाला
यां।प्रस्थेवृद्धमकर्क्यादीनां।मालादीनां च।अमहन्नवं नगरेनुदीचां।अर्मे चा
वर्णं द्व्यच्त्र्यच्।न भूताधिकसंजीवमद्राश्मकज्जलं।अंतः।सर्वं गुणकार्त्स्न्ये।
संज्ञायां गिरिनिकाययोः।कुमार्यां वयसि।उदकेकेवले।द्विगौक्रतौ।सभायां
नपुंसके।पुरे प्राचां।अरिष्टगौडपूर्वे च।न हास्तिनफलकमार्देयाः।कुसूलकू
पकुंभशालं बिले।दिक्शब्दा ग्रामजनपदाख्यानचानराटेषु।आचार्योपस
र्जनश्चांतेवासिनि।उत्तरपदवृद्धौ सर्वं च।बहुव्रीहौ विश्वं संज्ञायां।उदरा
श्वेषुषु।क्षेपे।नदी बंधुनि।निष्ठोपसर्गपूर्वमन्यतरस्यां।उत्तरपदादिः।कर्णो व
र्णलक्षणात्।संज्ञौपम्ययोश्च।कंठपृष्ठग्रीवाजंघं च।शृंगमवस्थायां च।नञो

जरमरमित्रमृताः। सोमैनसी। अलोमोषसी। कृत्यादयश्च। आद्युदात्तं द्व्यच्छ
न्दसि। वीरवीर्यौ च। कूलतीरतूलमूलशालाक्षसममव्ययीभावे। कंसमंथसू
र्प्पपार्प्यकाण्डं द्विगौ। तत्पुरुषे शालायां नपुंसके। कंथा च। आदिश्चिहणादीनां
। चेलखेटकटुककाण्डं गर्हायां। चीरमुपमानं। पललसूपशाकं मिश्रे। कूलसूद
स्थलकर्षाः संज्ञायां। अकर्मधारये राज्यं। वर्ग्यादयश्च। पुत्रः पुंभ्यः। नाचार्यराज
र्त्विक्संयुक्तज्ञात्याख्येभ्यः। चूर्णादीन्यप्राणिषष्ठ्याः। षट्ककाण्डादीनि। कुण्डं वनं।
प्रकृत्याभगालं। शितेर्नित्याबह्वज्बहुव्रीहावभसत्। गतिकारकोपपदात्कृत्
उभे वनस्पत्यादिषु युगपत्। देवताद्वन्द्वे च। नोत्तरपदेऽनुदात्तादावपृथिवीरुद्र
पूषमंथिषु। अंतः। थाथघञ्क्ताजबित्रकाणां। सूपमानात्क्तः। संज्ञायामनाचि
तादीनां। प्रवृद्धादीनां च। कारकाद्दत्तश्रुतयोरेवाशिषि। इत्थंभूतेन कृतमिति च।
अनो भावकर्मवचनः। मन्क्तिन्व्याख्यानशयनासनस्थानयाजकादिक्री
ताः। सप्तम्याः पुण्यं। ऊनार्थकलहं तृतीयायाः। मिश्रं चानुपसर्गमसंधौ। नञो गु
णप्रतिषेधे संपाद्यर्हहितालमर्थास्तद्धिताः। ययतोश्चातदर्थे। अच्कावशक्तौ।

आक्रोशे च। संज्ञायां। कृत्योकेष्णुच्चार्वादयश्च। विभाषा तृन्नन्नतीक्ष्णशुचिषु। बहुव्रीहा विदमेतत्तद्भ्यः। प्रथमपूरणयोः क्रियागणने। संख्यायास्तनः। विभाषा छंदसि। संज्ञायां मित्राजिनयोः। व्यवायिनोन्तरं। मुखं स्वांगं। नाव्ययदिक्छब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः। निष्ठोपमानादन्यतरस्यां। जातिकालसुखादिभ्यो नाछादनात्क्तोकृतमितप्रतियन्नः। वाजाते। नञ्सुभ्यां। कपि पूर्वं। ह्रस्वांतेंत्यात्पूर्वं। बहोर्नञ्वदुत्तरपदभूम्नि। न गुणादयोवयवाः। उपसर्गात्स्वांगं ध्रुवमपर्शु। वनं समासे। अंतः। अंतश्च। न निविभ्यां। परेरभितोभाविमंडलं। प्रादस्वांगं संज्ञायां। निरुदकादीनि च। अभेर्मुखं। अपाच्च। स्फिगपूतवीणांजोध्वकुक्षिसीरनामनाम च। अधेरुपरिस्थं। अनोरप्रधानकनीयसी। पुरुषश्चान्वादिष्टः। अतेरकृत्पदे। नेरनिधाने। प्रतेरंश्वादयस्तत्पुरुषे। उपाद्द्व्यजजिनमगौरादयः। सोरवक्षेपणे। विभाषोत्पुच्छे। द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ। सक्थं चाक्रांतात्। परादिश्छंदसि बहुलं। बहुव्रीहावाशंकागोः सीदसादिक्के निसार्थयुक्तारोस्यानठास्तिनकूलतीरदेवताविभाषात्

ञन।निविभ्यामेकोनविंशतिः। इति षष्ठाध्यायस्य द्वितीयः पादः॥२॥ अलुगु
त्तरपदे। पंचम्याः स्तोकादिभ्यः। ओजःसहोंभस्तमसस्तृतीयायाः। मनसः सं
ज्ञायां। आज्ञायिनि च। आत्मनश्च। वैयाकरणाख्यायां चतुर्थ्याः। परस्य च।
हलदंतात्सप्तम्याः संज्ञायां। कारनाम्नि च प्राचां हलादौ। मध्याद्गुरौ। अमूर्द्धमस्तकात्स्वां
गादकामे। बंधे च विभाषा। तत्पुरुषे कृति बहुलं। प्रावृट्शरत्कालदिवां जे। विभा
षा वर्षक्षरशरवरात्। घकालतनेषु कालनाम्नः। शयवासवासिष्वकालात्।
नेन्सिद्धबध्नातिषु च। स्थे च भाषायां। षष्ठ्या आक्रोशे। पुत्रेन्यतरस्यां। ऋतो
विद्यायोनिसंबंधेभ्यः। विभाषा स्वसृपत्योः। आनङृतो द्वंद्वे। देवताद्वंद्वे च।
ईदग्नेः सोमवरुणयोः। इद्वृद्धौ। दिवो द्यावा। दिवसश्च पृथिव्यां। उषासोषसः
मातरपितरावुदीचां। पितरामातरा च च्छंदसि। स्त्रियाः पुंवद्भाषितपुंस्का
दनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु। तसिलादिष्वाकृत्वसु
चः। क्यङ्मानिनोश्च। न कोपधायाः। संज्ञापूरण्योश्च। वृद्धिनिमित्तस्य च त

३४

स्यारक्तविकारे। स्वांगाच्चेतः। जातेश्च। पुंवत्कर्मधारयजातीयदेशीयेषु।
घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योनेकाचो ह्रस्वः। नद्याः शेषस्यान्य
तरस्यां। उगितश्च। आन्महतः समानाधिकरणजातीययोः। द्व्यष्टनः सं
ख्यायामबहुव्रीह्यशीत्योः। त्रेस्त्रयः। विभाषा चत्वारिंशत्प्रभृतौ सर्वेषां। हृ
दयस्य हृल्लेखयदण्लासेषु। वा शोकष्यञ्रोगेषु। पादस्य पदाज्यातिगो
पहतेषु। पद्यत्यतदर्थे। हिमकाशिहतिषु च। ऋचः शे। वा घोषमिश्रशब्दे
षु। उदकस्योदः संज्ञायां। पेषंवासवाहनधिषु च। एकहलादौ पूरयितव्ये
न्यतरस्यां। मंथौदनसक्तुबिंदुवज्रभारहारवीवधगाहेषु च। इको ह्रस्वो
ङ्यो गालवस्य। एक तद्धिते च। ङ्यापोः संज्ञाछंदसोर्बहुलं। त्वे च। इष्टके
शीकामालानां चिततूलभारिषु। खित्यनव्ययस्य। अरुर्द्विषदजंतस्य
मुम्। इच एकाचोम्प्रत्ययवच्च। वाचंयमपुरंदरौ च। कारे सत्यागदस्य।

श्येनतिलस्यपातेञे। रात्रेःकृति विभाषा। नलोपोनञः। तस्मान्नुडचि।
नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाके
षुप्रकृत्या। एकादिश्चैकस्यचादुक्। नगोप्राणिष्वन्यतरस्यां। सहस्यसः
संज्ञायां। ग्रंथांताधिकेच। द्वितीयेचानुपाख्ये। अव्ययीभावेचाकाले। वो
पसर्जनस्य। प्रकृत्याशिषि। गोवत्सहलेषु। समानस्यछंदस्यमूर्द्धप्रभृ
त्युदर्केषु। ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवच
नबंधुषु। चरणेब्रह्मचारिणि। तीर्थेये। विभाषोदरे। दृग्दृशवतुषु। इदंकि
मोरीश्की। आसर्वनाम्नः। विष्वग्देवयोश्चटेरद्र्यंचतावप्रत्यये। समःस
मि। तिरसस्तिर्यलोपे। सहस्यसध्रिः। सधमादस्थयोश्छंदसि। अंतरुपस
र्गेभ्योपईत्। ऊदनोर्देशे। अषष्ठ्यतृतीयास्थस्यान्यस्यदुगाशीराशास्था
स्थितोत्सुकोतिकारकरागच्छेषु। अर्थेविभाषा। कोःकत्तत्पुरुषेचि। रथ

व्टद्योश्च। तृणेच जातौ। कापथ्यक्षयोः। ईषदर्थे। विभाषापुरुषे। कवंचोष्णे। पथिच
छंदसि। पृषोदरादीनि यथोपदिष्टं। संख्याविसायपूर्वस्याह्नस्याहनन्यतरस्यांङेः।
ढ्रलोपे पूर्वस्य दीर्घोणः। सहिवहोरोदवर्णस्य। साढ्यै साढ्वा साढेति निगमे। संहितायां
। कर्णे लक्षणस्याविष्टाष्टपंचमणिभिन्नछिन्नछिद्रस्रुवस्वस्तिकस्य। नहिवृति
वृषिव्यधिरुचिसहिसहितनिषु क्वौ। वनगिर्योः संज्ञायां कोटरकिंशुलुकादीनां
। वले। मतौ बह्वचोनजिरादीनां। शरादीनांच। इकोवहेपीलोः। उपसर्गस्य घञ्यम
नुष्येबहुलं। इकः काशे। दस्ति। अष्टनः संज्ञायां। छंदसिच। चितेः कपि। विश्वस्यवसु
राटोः। नरे संज्ञायां। मित्रे चर्षौ। मंत्रे सोमाश्वेंद्रियविश्वदेव्यस्य मतौ। ओषधेश्च
विभक्तावप्रथमायां। ऋचितुनुघमक्षुतङ्कुत्रोरुष्याणां। इकः सुञि। द्व्यचोतस्ति
ङः। निपातस्यच। अन्येषामपिदृश्यते। चौ। संप्रसारणस्य। अलुक्षष्ठ्याजातेरि
को व्ययीभावकोरिकोवहेपीलोरे कोन विंशतिः। इति षष्ठाध्यायस्य तृतीयः पादः।
अंगस्य। हलः। नामि। नतिसृचतसृ। छंदस्युभयथा। नृच। नोपधायाः। सर्वनामस्था

नेच्यासंबुद्धौ। वाषपूर्वस्य निगमे। सांत महतः संयोगस्य। अप्तृन्तृच्स्वसृनप्तृनेष्टृ
त्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणां। इन्हन्पूषार्यम्णां शौ। सौ च। अत्वसंतस्य चाधातोः। अ
नुनासिकस्य क्विझलोः क्ङिति। अज्झनगमां सनि। तनोतेर्विभाषा। क्रमस्य क्ति। च्छ्वोः
शूठनुनासिके च। ज्वरत्वरस्रिव्यविमवामुपधायाश्च। राल्लोपः। असिद्धवद
त्राभात्। श्नान्नलोपः। अनिदितां हल उपधायाः क्ङिति। दंशसंजस्वंजां शपि।
रंजेश्च। घञि च भावकरणयोः। स्यदो जवे। अवोधौद्मप्रश्रथहिमश्रथाः। नां
चेः पूजायां। क्निस्कंदस्यंदोः। जांतनशां विभाषा। भंजेश्च चिणि। शास इदङ्ह
लोः। शा हौ। हंतेर्जः। अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झ
लि क्ङिति। वा ल्यपि। न क्तिचि दीर्घश्च। गमः क्वौ। विड्वनोरनुनासिकस्यात्। ज
नसनखनां सञ्झलोः। ये विभाषा। तनोतेर्यकि। सनः क्तिचि लोपश्चास्यान्यतर
स्यां। आर्द्धधातुके। भ्रस्जो रोपधयोररमन्यतरस्यां। अतो लोपः। यस्य हलः। क्यस्य
विभाषा। णेरनिटि। निष्ठायां सेटि। जनिता मंत्रे। शमिता यज्ञे। अयामंताल्वाय्ये

त्विष्णुषु। ल्यपि लघुपूर्वात्। विभाषापः। युप्लुवोर्दीर्घश्छंदसि। क्षियः। नि
ष्ठायामण्यदर्थे। वाक्रोशदैन्ययोः। स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशे
–नग्रहदृशां वा चिण्वदिट्। दीङो युडचि क्ङिति। आतो लोप इटि च। ईद्यति। घु
मास्थागापाजहातिसां हलि। एर्लिङि। वान्यस्य संयोगादेः। न ल्यपि। मयते
रिदन्यतरस्यां। लुङ्लङ्लृङ्क्ष्वडुदात्तः। आडजादीनां। छंदस्यपि दृश्यते। न माङ्यो
गे। बहुलं छंदस्यमाङ्योगेऽपि। ईरयीरे। अचि श्नुधातुभ्रुवां य्वोरियङुवङौ
। अभ्यासस्यासवर्णे। स्त्रियाः। वाम्शसोः। इणो यण्। एरनेकाचोऽसंयोगपू
र्वस्य। ओः सुपि। वर्षाभ्वश्च। न भूसुधियोः। छंदस्युभयथा। हुश्नुवोः सार्व
धातुके। भुवो वुग्लुङ्लिटोः। ऊदुपधाया गोहः। दोषो णौ। वा चित्तविरागे।
मितां ह्रस्वः। चिण्णमुलोर्दीर्घोऽन्यतरस्यां। खचि ह्रस्वः। ह्लादो निष्ठायां। छादे
र्घेऽद्व्युपसर्गस्य। इस्मन्त्रन्क्विषु च। गमहनजनखनघसां लोपः क्ङित्यनङि। त
निपत्योश्छंदसि। घसिभसोर्हलि च। हुझल्भ्यो हेर्धिः। श्रुशृणुपॄकृवृभ्यश्छंदसि।

अङितश्च। चिणो लुक्। अतो हेः। उतश्च प्रत्ययादसंयोगपूर्वात्। लोपश्चास्यान्यतर
स्यां म्वोः। नित्यं करोतेः। ये च। अत उत्सार्वधातुके। श्नसोरल्लोपः। श्नाभ्यस्तयोरातः। ई ह
ल्यघोः। इद्दरिद्रस्य। भियोऽन्यतरस्यां। जहातेश्च। आ च हौ। लोपो यि। घ्वसोरेद्धा
वभ्यासलोपश्च। अत एकहल्मध्येऽनादेशादेर्लिटि। थलि च सेटि। तॄफलभजत्रपश्च। राधो हिं
सायां। वा जॄभ्रमुत्रसां। फणां च सप्तानां। न शसददवादिगुणानां। अर्वणस्त्रसा ४
वनञः। मघवा बहुलं। भस्य। पादः पत्। वसोः संप्रसारणं। वाह ऊठ्। श्वयुवमघो
५० नामतद्धिते। अल्लोपोऽनः। षपूर्वहन्धृतराज्ञामणि। विभाषा ङिश्योः। न संयोगाद्व
मन्तात्। अचः। उदीत्। आतो धातोः। मन्त्रेष्वाङ्यादेरात्मनः। तिविंशतेर्डिति। टेः।
नस्तद्धिते। अह्नष्टखोरेव। ओर्गुणः। ढे लोपोऽकद्र्वाः। यस्येति च। सूर्यति
ष्यागस्त्यमत्स्यानां य उपधायाः। हलस्तद्धितस्य। आपत्यस्य च तद्धितेऽनाति।
क्यच्व्योश्च। बिल्वकादिभ्यश्छस्य लुक्। तुरिष्ठेमेयःसु। टेः। स्थूलदूरयुवह्रस्व
क्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः। प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृ

51

प्रदीर्घवृंदारकाणां प्रस्थस्फवर्वंहिगर्वर्षित्रप्द्राघिवृंदाः। वहोर्लोपो भूच वहोः
। इष्ठस्य पिङ्। ज्यादादीयसः। र ऋतो हलादेर्लघोः। विभाषर्जोश्छंदसि। प्र
कृत्यैकाच्। इनण्यनपत्ये। गाथिविदथिकेशिगणिपणिनश्च। संयोगादि
श्च। अन्। ये चाभावकर्मणोः। आत्मा ध्वानौ खे। नमपूर्वोपत्ये वर्मणः। ब्राह्मो
जातौ। कार्मस्ताच्छील्ये। औक्षमनपत्ये। दांडिनायनहास्तिनायनाथर्वणि
कजैह्मासिनेयवाशिनायनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्म
यानि। ऋच्छवास्त्ववास्त्वमाध्वीहिरण्मयानि छंदसि। अंगस्यरालुग्योवि
र्वनोर्वाक्रोशेणापण्कुशल्भ्यस्थलिचमंत्रेध्वारभृतः पंचदश। इति षष्ठा
ध्यायस्य चतुर्थः पादः। समाप्तः षष्ठोध्यायः। ६। युवोरनाकौ। आयनेयी
नीयियः फढखछघां प्रत्ययादीनां। झोंतः। अदभ्यस्तात्। आत्मनेपदेष्वनतः।
शीङो रुट्। वेत्तेर्विभाषा। बहुलं छंदसि। अतो भिस ऐस्। बहुलं छंदसि।

नेदमदसोरकोः। टाङसिङसामिनात्स्याः। ङेर्यः। सर्वनाम्नः स्मै। ङसिङ्योः स्मा
त्स्मिनौ। पूर्वादिभ्यो नवभ्यो वा। जसः शी। औङ आपः। नपुंसकाच्च। जस्श
सोः शिः। अष्टाभ्य औश्। षड्भ्यो लुक्। स्वमोर्नपुंसकात्। अतोऽम्। अद्ड्डु
तरादिभ्यः पंचभ्यः। नेतराच्छंदसि। युष्मदस्मद्भ्यां ङसोऽश्। ङे प्रथमयोरम्
। शसो नः। भ्यसो भ्यं। पंचम्या अत्। एकवचनस्य च। साम आकम्। आत
औ णलः। तुह्योस्तातङाशिष्यन्यतरस्यां। विदेः शतुर्वसुः। समासेऽनञ्पूर्वे
क्त्वो ल्यप्। क्त्वापि छंदसि। सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः। अमो
मश्। लोपस्त आत्मनेपदेषु। ध्वमो ध्वात्। यजध्वैनमिति च। तस्य तात्।
तप्तनप्तनथनाश्च। इदंतो मसि। क्त्वो यक्। इष्ट्वीनमिति च। स्नात्व्यादय
श्च। आज्जसेरसुक्। अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि। आमि स
र्वनाम्नः सुट्। त्रेस्त्रयः। ह्रस्वनद्यापो नुट्। षट्चतुर्भ्यश्च। श्रीग्रामण्योः

श्छंदसि। गोष्पादांते। इदितोनुम्धातो। शेमुचादीनां। मस्जिनशोर्झलि। र
धिजभोरचि। नेट्यलिटिरधेः। रभेरशब्लिटोः। लभेश्च। आङोयि। उपात्प्र
शंसायां। उपसर्गात्खलघञोः नसुदुर्भ्यांकेवलाभ्यां। विभाषाचिण्णमुलोः। उगि
दचांसर्वनामस्थानेधातोः। युजेरसमासे। नपुंसकस्यझलचः। इकोचिवि
भक्तौ। तृतीयादिषुभाषितपुंस्कंपुवद्गालवस्य। अस्थिदधिसक्थ्यक्ष्णाम
नङुदात्तः। छंदस्यपिदृश्यते। ईचद्विवचने। नाभ्यस्ताच्छतुः। वानपुंसकस्य
। आच्छीनद्योर्नुम्। श्यपश्यनोर्नित्यं। सावनडुहः। दृक्स्ववःस्वतवसांछंद
सि। दिवऔत्। पथिमथ्यृभुक्षामात्। इतोत्सर्वनामस्थाने। थोन्थः। भस्य
टेर्लोपः। पुंसोसुङ्। गोतोणित्। णलुत्तमोवा। सख्युरसंबुद्धौ। अनङ्सौ। ऋ
दुशनस्पुरुदंसोनेहसांच। तृज्वत्क्रोष्टुः। स्त्रियांच। विभाषातृतीयादिष्वचि।
चतुरनडुहोरामुदात्तः। अम्संबुद्धौ। ऋतइद्धातोः। उपधायाश्च। उदोष्ठ्यपूर्वस्य।

बहुलं छंदसि। युवोरशाभ्यो लोपस्तर धिजभोशपूस्यनोरूपधाया सृत्रीलिं

।३ इति सप्तमाध्यायस्य प्रथमः पादः। सिचि वृद्धिः परस्मैपदेषु। अतो ल्लांत

स्य। वदव्रजहलंतस्याचः। नेटि। ह्म्यंतक्षणश्वसजागृणिश्व्येदितां। ऊर्णोते

र्विभाषा। अतो हलादेर्लघोः। नेड्वशि कृति। तितुत्रतथसिसुसरकसेषु च।

एकाच उपदेशेनुदात्तात्। श्र्युकः किति। सनि ग्रहगुहोश्च। कृसृभृवृस्तुद्रुस्रु

श्रुवो लिटि। श्वीदितो निष्ठायां। यस्य विभाषा। आदितश्च। विभाषा भावा

दिकर्मणोः। क्षुब्धस्वांतध्वांतलग्नम्लिष्टविरिब्धफांटवाढानि मंथमनस्त

मःसक्ताविस्पष्टस्वरानायासभृशेषु। धृषिशसी वैयात्ये। दृढः स्थूलबलयोः

।प्रभौपरिवृढः। कृच्छ्रगहनयोः कषः। घुषिरविशब्दने। अर्देः संनिविभ्यः।

अभेश्चाविदूर्ये। णेरध्ययने वृत्तं। वादांतशांतपूर्णदस्तस्पष्टछन्नज्ञप्ताः। रु

ष्यमत्वरसंघुषास्वनां। हृषेर्लोमसु। अपचितश्च। हु ह्वरेश्छंदसि। अपरिह्वृ

२१

53

त

ताश्च। सोमेऽह्रितः। ग्रसितस्कभितस्तभितो...भितचत्तविकस्ताविशस्त
शंस्तृशास्ततरुतृतरूतृवरूतृवरूत्रीरुज्वलितिक्षरितिक्षमितिवमित्य
मितीतिच। आर्द्धधातुकस्येड्वलादेः। स्नुक्रमोरनात्मनेपदनिमित्ते। ग्रहो
लिटिदीर्घः। वृतोवा। नलिङि। सिचिचपरस्मैपदेषु। इट्सनिवा। लिङ्
सिचोरात्मनेपदेषु। ऋतश्चसंयोगादेः। स्वरतिसूतिसूयतिधूञूदितो
वा। रधादिभ्यश्च। निरःकुषः। इएनिष्ठायां। तीषसहलुभरुषरिषः। सनी
वंतर्द्धभ्रस्जदंभुश्रिस्वृयूर्णुभरज्ञपिसनां। क्लिशःक्त्वानिष्ठयोः। पूङश्च। व
सतिक्षुधोरिट्। अंचेःपूजायां। लुभोविमोहने। जृव्रश्च्योःक्त्वि। उदितोवा।
सेसिचि। कृतचृतछृदतृदनृतः। गमेरिट्परस्मैपदेषु। नवृद्भ्यश्चतुर्भ्यः।
तासिचक्लृपः। अचस्तास्वत्थल्यनिटोनित्यं। उपदेशेऽत्वतः। ऋतोभारद्वाजस्य।
बभूथाततंथजगृभ्मववर्थेतिनिगमे। विभाषासृजिदृशोः। इडत्यर्तिव्य

पतीनां। वस्येकाजाद्घसां। विभाषागमहनविदविशां। सनिंससनिवांसं।
ऋअनोः स्ये। अञ्जेः सिचि। स्तुसुधूञ्भ्यः परस्मैपदेषु। यमरमनमातां सक्च।
स्मिपूङ्रञ्ज्वशां सनि। किरश्च पंचभ्यः। रुदादिभ्यः सार्वधातुके। ईशः से। ईडज
नोर्ध्वे च। लिङः सलोपानंसस्य। अतो येयः। आतो ङितः। आने मुक्। ईदासः।
अष्टन आ विभक्तौ। रायो हलि। युष्मदस्मदोरनादेशे। द्वितीयायां च। प्रथमाया
श्च द्विवचने भाषायां। योऽचि। शेषे लोपः। मपर्यंतस्य। युवावौ द्विवचने। यूयव
योज सि। त्वाहौ सौ। तुभ्यमह्यौ ङयि। तवममौ ङसि। त्वमावेकवचने। प्रत्ययोत्त
रपदयोश्च। त्रिचतुरोः स्त्रियां तिसृचतसृ। अचि र ऋतः। जराया जरसन्यतरस्यां
। त्यदादीनामः। किमः कः। कुतिहोः। क्वाति। तदोः सः सावनंत्ययोः। अदस औ सुलो
पश्च। इदमो मः। दश्च। यः सौ। इदोऽय पुंसि। अनाप्यकः। हलि लोपः। मृजेर्वृद्धिः।
अचो ञ्णिति। अत उपधायाः। तद्धितेष्वचामादेः। किति च। सिचिप्रभाविटूस

54

न्यच्च। अतो जरायाः अष्टादश। इति सप्तमाध्यायस्य द्वितीयः पादः। देविका। शिंशपादित्यवाड्दीर्घ
सत्रश्रेयसामात्। केकयमित्रयुप्रलयानां यादेरियः। न य्वाभ्यां पदांताभ्यां पूर्वौ तु ताभ्यामैच्। द्वारा
दीनां च। न्यग्रोधस्य च केवलस्य। न कर्मव्यतिहारे। स्वागतादीनां च। श्वादेरिञि। पदांतस्यान्यतरस्यां।
उत्तरपदस्य। अवयवादृतोः। सुसर्वार्द्धाज्जनपदस्य। दिशोमद्राणां। प्राचां ग्रामनगराणां। संख्यायाः
संवत्सरसंख्यस्य च। वर्षस्याभविष्यति। परिमाणांतस्यासंज्ञाशाणयोः। जे प्रोष्ठपदानां। हृद्भगसिंध्व
ते पूर्वपदस्य च। अनुशतिकादीनां च। देवताद्वंद्वे च। नेंद्रपरस्य। दीर्घाच्च वरुणस्य। प्राचां नगरांते। जंग
लधेनुवलजांतस्य विभाषितमुत्तरं। अर्द्धात्परिमाणस्य पूर्वस्य तु वा। नातः परस्य। प्रवाहणस्य ढे
। तत्प्रत्ययस्य। नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानां। यथातथयथापुरयोः पर्यायेण। हनस्तोऽचि
ण्णलोः। आतो युक् चिण्कृतोः। नोदात्तोपदेशस्य मान्तस्यानाचमेः। जनिवध्योश्च। अर्त्तिह्रीव्लीरीक्नू
यीक्ष्माय्यातां पुग्णौ। शाच्छासाह्वाव्यावेपां युक्। वो विधूनने जुक्। लीलोर्नुग्लुकावन्यतरस्यां स्ने
हविपातने। भियो हेतुभये षुक्। स्फायो वः। शदेरगतौ तः। रुहः पोऽन्यतरस्यां। प्रत्ययस्थात्कात्पूर्वस्या
त इदाप्यसुपः। न यासयोः। उदीचामातः स्थाने यकपूर्वायाः। भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि॥
अभाषितपुंस्काच्च। आदाचार्याणां। ठस्येकः। इसुसुक्तांतात्कः। चजोः कु घिण्ण्यतोः। न्यंकादीनां च
। हो हंतेर्ञ्णिन्नेषु। अभ्यासाच्च। हेरचङि। संलिटोर्जेः। विभाषा चेः। न क्वादेः। अजिव्रज्योश्च। भुज

न्युब्जौ पाण्युपतापयोः। प्रयाजानुयाजौ यज्ञाङ्गे। वञ्चेर्गतौ। ओक उचः के। ण्य आवश्यके। यज
याचरुचप्रवचर्चश्च। वचोऽशब्दसंज्ञायां। प्रयोज्यनियोज्यौ शक्यार्थे। भोज्यं भक्ष्ये। घोर्लोपो लेटि
वा। ओतः श्यनि। क्सस्याचि। लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये। शमामष्टानां दीर्घः श्य
नि। ष्ठिवुक्लमुचमां शिति। क्रमः परस्मैपदेषु। इषुगमियमां छः। पाघ्राध्मास्थाम्नादाण्दृश्यर्त्ति
सर्त्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः। ज्ञाजनोर्जा। प्वादीनां ह्रस्वः। मीना
तेर्निगमे। मिदेर्गुणः। जुसि च। सार्वधातुकार्धधातुकयोः। जाग्रोऽविचिण्णल्ङित्सु। पुगन्तलघू
पधस्य। नाभ्यस्तस्याचि पिति सार्वधातुके। भूसुवोस्तिङि। उतो वृद्धिर्लुकि हलि। ऊर्णोतेर्विभाषा।
गुणोऽपृक्ते। तृणह इम्। ब्रुव ईट्। यङो वा। तुरुस्तुशम्यमः सार्वधातुके। अस्तिसिचोऽपृक्ते। बहुलं
छन्दसि। रुदश्च पञ्चभ्यः। अड्गार्ग्यगालवयोः। अदः सर्वेषां। अतो दीर्घो यञि। सुपि च। बहुवच
ने झल्येत्। ओसि च। आङि चापः। सम्बुद्धौ च। अम्बार्थनद्योर्ह्रस्वः। ह्रस्वस्य गुणः। जसि च। ऋतो
ङिसर्वनामस्थानयोः। घेर्ङिति। आण्नद्याः। याडापः। सर्वनाम्नः स्याड्ढ्रस्वश्च। विभाषा द्वितीयातृ
तीयाभ्यां। ङेराम्नद्याम्नीभ्यः। इदुद्भ्यां। औत्। अच्च घेः। आङो नाऽस्त्रियां। देविकादेवतास्फायोभुज
मीनातेरतो विंशतिः। इति सप्तमाध्यायस्य तृतीयः पादः। णौ चङ्युपधाया ह्रस्वः। नाग्लोपिशास्वृ
दितां। भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्यां। लोपः पिबतेरीच्चाभ्यासस्य। तिष्ठतेरित्। जि

38

घ्रातेर्वा। उर्ऋत्। नित्यं छंदसि। दयतेर्दिगि लिटि। ऋतश्च संयोगादेर्गुणः। ऋछत्यृतां।
शॄदॄप्रां ह्रस्वो वा। केणः। न कपि। आपोन्यतरस्यां। ऋदृशोङि गुणः। अस्यतेस्थुक्।
श्वयतेरः। पतः पुम्। वच उं। शीङः सार्वधातुके गुणः। अयङ्यि क्ङिति। उपसर्गाध्रस्व ऊह
तेः। एतेर्लिङि। अकृत्सार्वधातुकयोर्दीर्घः। च्वौ च। रीङ् ऋतः। रिङ् शयग्लिङ्क्षु। गुणोर्तिसं
योगाद्योः। यङि च। ई घ्राध्मोः। अस्य च्वौ। क्यचि च। अशनायोदन्यधनाया बुभुक्षापिपा
सागर्द्धेषु। न छंदस्यपुत्रस्य। दुरस्युर्द्रविणस्युर्वृषण्यति रिषण्यति। अश्वाघ
स्यात्। देवसुम्नयोर्यजुषि काठके। कव्यध्वरपृतनस्यर्चि लोपः। द्यतिस्यतिमा
स्थामित्ति किति। शाछोरन्यतरस्यां। दधातेर्हिः। जहातेश्च क्त्वि। विभाषा छं
दसि। सुधितवसुधितनेमधितधिष्वधिषीय च। दोदद्घोः। अच उपसर्गा
तः। अपो भि। सस्यार्द्धधातुके। तासस्त्योर्लोपः। रि च। ह एति। यीवर्णयोर्दीधी
वेव्योः। सनि मीमाघुरभलभशकपतपदामच इस्। आप्ज्ञप्‌ऋधामीत्। दं
भ इच्च। मुचोकर्मकस्य गुणो वा। अत्र लोपोभ्यासस्य। ह्रस्वः। हलादिः शेषः। श

पूर्वाः खयः। कुहोश्चुः। न कवतेर्यङि। कृषेश्छंदसि। दाधर्ति दर्धर्ति दर्द्धर्षि बोभू
तुते तेतिक्ते लर्ष्यापनीफणत्संसनिष्पदत्करिक्रत्कनिक्रदद्भरिभ्रद्दविध्वतो
दविद्युतत्तरित्रतः। सरीसृपतं चरीवृजन्मर्मृज्यागनीगंतीति च। उरत्।
स्रुति स्वाप्योः संप्रसारणं। व्यथो लिटि। दीर्घ इणः किति। अत आदेः। तस्मा
न्नुड् द्विहलः। अश्नोतेश्च। भवतेरः। ससूवेति निगमे। निजां त्रयाणां गुणः
श्लौ। भृञामित्। अर्तिपिपर्त्योश्च। बहुलं छंदसि। सन्यतः। ओः पुयण्ज्य
परे। स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा। गुणो यङ्लुकोः।
दीर्घोऽकितः। नीग्वंचुस्रंसुध्वंसुभ्रंसुकसपतपदस्कंदां। नुगतोऽनुनासिकां
तस्य। जपजभदहदशभंजपशां च। चरफलोश्च। उत्परस्यातः। ति च। री
गृदुपधस्य च। रुग्रिकौ च लुकि। ऋतश्च। सन्वल्लघुनि चङ्परेऽनग्लोपे। दीर्घो
लघोः। अत्स्मृदृत्वरप्रथम्रदस्तृस्पशां। विभाषा वेष्टिचेष्ट्योः। ई च गणः। णौ

56

शीङः शाच्छोः शपूर्वाः स्नवति सप्तदश । इति सप्तमाध्यायस्य चतुर्थः
पादः । समाप्तः सप्तमोध्यायः । सर्वस्य द्वे । तस्य परमाम्रेडितं । अनुदात्तं च ।
नित्यवीप्सयोः । परेर्वर्जने । प्रसमुपोदः पादपूरणे । उपर्यध्यधसः सामी
प्ये । वाक्यादेरामंत्रितस्यासूयासंमतिकोपकुत्सनभर्त्सनेषु । एकं बहु
व्रीहिवत् । आबाधे च । कर्मधारयवदुत्तरेषु । प्रकारे गुणवचनस्य । अ
कृच्छ्रे प्रियसुखयोरन्यतरस्यां । यथास्वे यथायथं । द्वंद्वं रहस्यमर्यादावच
नव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु । पदस्य । पदात् । अनुदात्तं सर्व
मपादादौ । आमंत्रितस्य । युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्ना
वौ । बहुवचनस्य वस्नसौ । तेमयावेकवचनस्य । त्वामौ द्वितीयायाः । न चवा
हाहैवयुक्ते । पश्यार्थैश्चानालोचने । सपूर्वायाः प्रथमाया विभाषा । तिङो
गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः । तिङ् अतिङः । न लुट् । निपातैर्यद्यदिहन्तकुवि

न्नेच्चेच्चणकच्चिद्यत्रयुक्तं। नह प्रत्यारंभे। सत्यं प्रश्ने। अंगाप्रातिलोम्ये।
।हि च। छंदस्यनेकमपि साकांक्षं। यावद्यथाभ्यां। पूजायां नानंतरं। उपसर्गव्य
पेतं च। तुपश्यपश्यताहैः पूजायां। अहो च। शेषे विभाषा। पुरा च परीप्सायां
।नन्वित्यनुज्ञैषणायां। किं क्रियाप्रश्नेनुपसर्गमप्रतिषिद्धं। लोपे विभाषा
।एहि मन्ये प्रहासे लृट्। जात्वपूर्वं। किंवृत्तं च चिदुत्तरं। आहो उताहो चानं
तरं। शेषे विभाषा। गत्यर्थलोटा लृण्न चेत्कारकं सर्वान्यत्। लोट् च। विभाषि
तं सोपसर्गमनुत्तमं। हंत च। आम एकांतरमामंत्रितमनंतिके। यद्धितपरं
छंदसि। चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः। चादिषु च। चवायोगे
प्रथमा। हेति क्षियायां। अहेति विनियोगे च। चाहलोप एवेत्यवधारणं। चा
दिलोपे विभाषा। चैवावेति च छंदसि। एकान्याभ्यां समर्थाभ्यां। यद्वृत्तान्नित्यं।
पूजनात्पूजितमनुदात्तं। सगतिरपि तिङ्। कुत्सने च सुप्यगोत्रादौ। गतिर्गतौ।

पे

तिङि-चोदात्तवति। आमंत्रितं पूर्वमविद्यमानवत्। नामंत्रिते समानाधिकरणे सामान्यवचनं। विभाषितं विशेषवचने। सर्वस्य बहुवचन न स्पर्शहेति चतुर्दश॥इ तिअष्टमाध्यायस्य प्रथमः पादः। पूर्वत्रासिद्धं। नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति। नमुने। उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्य। एकादेश उदात्तेनोदात्तः। स्वरितो वानुदात्ते पदादौ। नलोपः प्रातिपदिकांतस्य। नङिसंबुध्योः। मादुपधायाश्च मतोर्वोयवादिभ्यः। झयः। संज्ञायां। आसंदीवदष्टीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती। उदन्वानुदधौ च। राजन्वान्सौराज्ये। छंदसीरः। अनोनुट्। ना-धस्य। कृपेरोलः। उपसर्गस्यायतौ। ग्रोयङि। अचि विभाषा। परेश्च घांकयोः। संयोगांतस्य लोपः। रात्सस्य। धि च। झलो झलि। ह्रस्वादंगात्। रटरटि। स्कोः संयोगाद्योरंते च। चोः कुः। होढः। दादेर्धातोर्घः। वाद्रुहमुहष्णुहष्णिहां। नहोधः। आहस्थः। व्रश्चभ्रस्जसृजमृजयजराजभ्राजछशां षः। एकाचोब

शो भष्झषंतस्य स्ध्वोः। दधस्तथोश्च। झलां जशोंते। झषस्तथोर्द्धोधः। षढोः कः सि। रदाभ्यां
निष्ठातो नः पूर्वस्य च दः। संयोगादेरातो धातोर्यण्वतः। ल्वादिभ्यः। ओदितश्च। क्षि
यो दीर्घात्। श्योऽस्पर्शे। अंचोऽनपादाने। दिवोऽविजिगीषायां। निर्वाणोऽवाते। शुषः कः।
पचो वः। क्षायो मः। प्रस्त्योऽन्यतरस्यां। अनुपसर्गात्फुल्लक्षीवकृशोल्लाघाः। नुदवि
दोंदत्राघ्राह्रीभ्योऽन्यतरस्यां। न ध्याख्यापॄमूर्छिमदां। वित्तो भोगप्रत्यययोः। भित्तं श
कलं। ऋणमाधमर्ण्ये। नसत्तनिषत्तानुत्तप्रतूर्तसूर्तगूर्तानि छंदसि। क्विन्प्रत्ययस्य
कुः। नशेर्वा। मो नो धातोः। म्वोश्च। ससजुषो रुः। अवयाः श्वेतवाः पुरोडाश्च। अहन्।
रोऽसुपि। अम्नरूधरवरित्युभयथा छंदसि। भुवश्च महाव्याहृतेः। वसुस्रंसुध्वं
स्वनडुहां दः। तिप्यनस्तेः। सिपि धातो रुर्वा। दश्च। र्वोरुपधाया दीर्घ इकः। हलि च। उप
धायां च। न भकुर्छुरां। अदसोऽसेर्दादु दो मः। एत ईद्बहुवचने। वाक्यस्य टेः प्लुत उदा
त्तः। प्रत्यभिवादेऽशूद्रे। दूराद्धूते च। हैहेप्रयोगे हैहयोः। गुरोरनृतोऽनंत्यस्याप्येकैक
स्य प्राचां। ओमभ्यादाने। ये यज्ञकर्मणि। प्रणवष्टेः। याज्यांतः। ब्रूहिप्रेष्यश्रौषड्वौषडा

वहानामादेः। अग्नीत्प्रेषणे परस्य च। विभाषा पृष्टप्रतिवचने हेः। निगृ
ह्यानुयोगे च। आम्रेडितं भर्त्सने। अंगयुक्तं तिङाकांक्षं। विचार्यमाणानां
। पूर्वं तु भाषायां। प्रतिश्रवणे च। अनुदात्तं प्रश्नान्ताभिपूजितयोः। चिदि
ति चोपमार्थे प्रयुज्यमाने। उपरिस्विदासीदिति च। स्वरितमाम्रेडितेऽसूयासं
मतिकोपकुत्सनेषु। क्षियाशीःप्रैषेषु तिङाकांक्षं। अनन्त्यस्यापि प्रश्ना
ख्यानयोः। प्लुतावैच इदुतौ। एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदु
तौ। तयोर्य्वावचि संहितायां। पूर्वत्राचिषड्गेनैसत्तैन्तई च्छिदिसष्टो। इति अ
ष्टमाध्यायस्य द्वितीयः पादः। मतुवसो रु संबुद्धौ छंदसि। अत्रानुनासिकः
पूर्वस्य तु वा। आतोऽटि नित्यं। अनुनासिकात्परोऽनुस्वारः। समः सुटि।
पुमः खय्यम्परे। नश्छव्यप्रशान्। उभयथर्क्षु। दीर्घादटि समानपदे। नॄन्पे।
स्वतवान्यायौ। कानाम्रेडिते। ढो ढे लोपः। रो रि। खरवसानयोर्विसर्जनीयः।

रोः सुपि । भोभगोअघोअपूर्वस्य योशि । व्योर्लघुप्रयत्नतरः शाकटायनस्य
। लोपः शाकल्यस्य । ओतो गार्ग्यस्य । उञि च पदे । हलि सर्वेषां । मोनुस्वारः । नश्चा
पदान्तस्य झलि । मोराजि समः क्वौ । हे मपरे वा । नपरे नः । ङ्णोः कुक्टुक् शरि । डः सि
धुट् । नश्च । शि तुक् । ङमो ह्रस्वादचि ङमुण्नित्यं । मय उञो वो वा । विसर्जनीय
स्य सः । शर्परे विसर्जनीयः । वा शरि । कुप्वोः ≍क≍पौ च । सोपदादौ । इणः षः । न
मस्पुरसोर्गत्योः । इदुदुपधस्य चाप्रत्ययस्य । तिरसोन्यतरस्यां । द्विस्त्रिश्च
तुरिति कृत्वोर्थे । इसुसोः सामर्थ्ये । नित्यं समासेनुत्तरपदस्थ । अतः कृक
मिकंसकुंभपात्रकुशाकर्णीष्वनव्ययस्य । अधः शिरसी पदे । कस्कादिषु च ।
छंदसि च प्राम्रेतयोः । कः करत्करति । कृधिकृतेष्वनदितेः । पंचम्याः पराव
ध्यर्थे । पातौ च बहुलं । षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु । इडाया वा
। अपदान्तस्य मूर्द्धन्यः । सहेः साडः सः । इण्कोः । नुम्विसर्जनीयशर्व्यवाये
पि । आदेशप्रत्यययोः । शासिवसिघसीनां च । स्तौतिण्योः

रेव षण्यभ्यासात् । सः स्विदिस्विदिसहीनां च । प्राक्सितादड्व्यवायेपि । स्था
दिष्वभ्यासेन चाभ्यासस्य । उपसर्गात्सुनोति सुवति स्यति स्तौति स्तोभति स्थासे
नयसेधसिचसंजष्वंजां । सदिरप्रतेः । स्तम्भेः । अवाच्चालंबनाविदूर्ययोः ।
वेश्च स्वनो भोजने । परिनिविभ्यः सेवसितसयसिवुसहसुट्स्वंजां । सिवादी
नां वाड्व्यवायेपि । अनुविपर्यभिनिभ्यः स्यंदतेरप्राणिषु । वेः स्कंधेरनिष्ठायां
। परेश्च । परिस्कंदः प्राच्यभरतेषु । स्फुरतिस्फुलत्योर्निर्निविभ्यः । वेस्कंभ्ना
तेर्नित्यं । इणः षीध्वंलुङ्लिटां धोंगात् । विभाषेटः । समासेंगुलेः संगः । भीरोः
स्थानं । अग्नेः स्तुत्स्तोमसोमाः । ज्योतिरायुषः स्तोमः । मातृपितृभ्यां ष्वसा । मा
तुःपितुर्भ्यामन्यतरस्यां । अभिनिसः स्तनः शब्दसंज्ञायां । उपसर्गप्रादुर्भ्याम
स्तिर्यच्परः । सुविनिर्दुर्भ्यः सुपिसूतिसमाः । निनदीभ्यां स्नातेः कौशले । सूत्रं प्रति
ष्णातं । कपिष्ठलो गोत्रे । प्रष्ठोग्रगामिनि । वृक्षासनयोर्विष्टरः । छंदोनाम्नि च ।
गवियुधिभ्यां स्थिरः । विकुशमिपरिभ्यः स्थलं । अंबांबगोभूमिसव्यापद्वित्रि

कुशाकुशंकुगुमंजिपरमेवर्हिर्दिव्यग्निभ्यः स्थः। सुषामादिषु च। एतिसंज्ञाया
मगात्। नक्षत्राद्वा। ह्रस्वात्तादौ तद्धिते। निसस्तपतावनासेवने। युष्मत्तत्ततक्षुष्वं
तः। यजुष्येकेषां। स्तुतस्तोमयोश्छंदसि। पूर्वपदात्। सुञः। सुनोतेरनः। सहेः प्र
तनर्ताभ्यां च। न रपरसृपिसृजिस्पृशिस्पृहिसवनादीनां। सात्पदाद्योः। सिचो यङि
। सेधतेर्गतौ। प्रतिस्तब्धनिस्तब्धौ च। सोढः। स्तंभुसिवुसहां चङि। सुनोतेः स्यस
नोः। सदिष्वंज्योः परस्य लिटि। निव्यभिभ्योऽड्व्यवाये वा छंदसि। मतुवसोरुजिन्चे
दुपधस्यौतिएया भीरोह स्वादेकोनविंशतिः। इति अष्टमाध्यायस्य तृतीयः पादः। र
षाभ्यां नो णः समानपदे। अट्कुप्वाङ्नुम्व्यवायेपि। पूर्वपदात्संज्ञायामगः। वनंपु
रगामिश्रकासिध्रकासारिकाकोटराग्रेभ्यश्च। प्रनिरंतःशरेक्षुप्लक्षाम्रकार्ष्यख
दिरपीयूक्षाभ्योसंज्ञायामपि। विभाषौषधिवनस्पतिभ्यः। अह्नोऽदंतात्। वाहनमा
हितात्। पानं देशे। वा भावकरणयोः। प्रातिपदिकांतनुम्विभक्तिषु च। एकाजुत्त
रपदे णः। कुमति च। उपसर्गादसमासेपि णोपदेशस्य। हिनुमीना। आनि लोट्।

नेर्गदनदपतपदघुमास्यतिहंतियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचि
नोतिदेग्धिषु च। शेषे विभाषाकखादावषांत उपदेशे। अनितेः। अंतः। उभौ साभ्या
सस्य। हंतेरत्पूर्वस्य। वमोर्वा। अंतरदेशयोः। अयनं च। छंदस्यृदवग्रहात्। नश्च धा
तुस्थोरुषुभ्यः। उपसर्गाद्बहुलं। कृत्यचः। णेर्विभाषा। हलश्चेजुपधात्। इजादेः
सनुमः। वा निंसनिक्षनिंदां। न भाभूपूकमिगमिप्यायीवेपां। षात्पदांतात्। नशेः
षांतस्य। पदांतस्य। पदव्यवायेपि। क्षुभ्नादिषु च। स्तोः श्चुना श्चुः। ष्टुना ष्टुः। न पदांता
ट्टोरनां। तोः षि। शात्। यरोनुनासिकेनुनासिको वा। अचो रहाभ्यां द्वे। अनचि च।
नादिन्याक्रोशे पुत्रस्य। शरोचि। त्रिप्रभृतिषु शाकटायनस्य। सर्वत्र शाकल्यस्य
। दीर्घादाचार्याणां। झलां जश् झशि। अभ्यासे चर्च। खरि च। वावसाने। अणोप्र
गृह्यस्यानुनासिकः। अनुस्वारस्य ययि परसवर्णः। वा पदांतस्य। तोर्लि। उदः
स्थास्तंभोः पूर्वस्य। झयो होन्यतरस्यां। शश्छोटि। हलो यमां यमि लोपः। झ
रो झरि सवर्णे। उदात्तादनुदात्तस्य स्वरितः। नोदात्तस्वरितोदयमगार्ग्यका
श्यपगालवानां। अ अ। रषाभ्यामुभौ हुनौ दस्यास्तंभोरषां। इत्यष्टमाध्यायस्य चतु

[OrderDescription]
,CREATED=06.10.20 10:46
,TRANSFERRED=2020/10/06 at 10:56:39
,PAGES=101
,TYPE=STD
,NAME=S0003896
,Book Name=M-1031-ASHTAYDHYAYI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF

FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF

FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF

FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF

FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF

FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF

FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF

FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF

FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,